B.A. Sanskrit
Year – I
Semester – II
Paper - V

# हितोपदेशः (उत्तरार्धः)
# Hitopadesa (Uttterarda)


## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE
**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# हितोपदेशः-(उत्तरार्धः)

**पाठ्यपरिचयः**

गद्यसाहित्यस्य स्वरूपप्रतिपादने हितोपदेशस्य महनीयता वर्तते। पाठ्येस्मिन् छात्राणां संस्कृतगद्यसाहित्यं प्रति अभिरुचिसम्पादयितुं विशेषोपक्रमः कल्पितः। पाठ्योऽयं हितोपदेशग्रन्थस्य द्वितीयभागस्य विषयवस्तुनः अवधेयांशाः वर्तते। ग्रन्थाधारेण विग्रहादारभ्य सन्धिः पर्यन्तम् आलोचितांशः पाठ्येऽस्मिन् उपस्थाप्यते। अनेन छात्राणां गद्यसाहित्यं प्रति अभिरुचिः तत्रापि कथितानां मानवीयमूल्यबोधानां ज्ञानं नूनं सम्भवतीति धिया अयं च विषयः शास्त्रीकक्षायां प्रारम्भिकस्थले नियोजितः।

**प्रथमः खण्डः – (विग्रहः) अथ पुनः कथारम्भकाले राजपुत्रा इत्यारभ्य नीलवर्णश्रृगालवदिति पर्यन्तम्।**

अस्मिन् खण्डे तत्र प्रथमा कथा भवति पक्षिवानरकथा। तया कथया विदुषामेव उपदेशः कर्तव्यः नतु मूर्खाणामिति नीतिः बोधिता। ततः रजकस्य गर्दभकथा भवति । तत्र स्ववाचैव मूर्खो विनश्यति इति नीतिं बोधयति ग्रन्थकारः। ततः गजयूथशशिनः कथा भवति। तत्र अधिकबलवत्पुरुषादरः कार्यकरः इति नीतिं द्योतयति। ततः दुर्जनेन न स्थातव्यं न गन्तव्यमिति नीतिद्योतनाय हंसकाककथा काकवर्तककथा च प्रतिपादितौ। ततः रथकारकथा भवति तत्र च प्रत्यक्षेऽपि दोषे दृष्टे मूर्खः सान्त्वेन तुष्यति इति नीतिः बोधिता।

**द्वितीयः खण्डः – अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया इत्यारभ्य विग्रहो नाम तृतीयाकथासङ्ग्रहः इत्यन्तपर्यन्तम्।**

अस्मिन् खण्डे मेघवर्णः गृध्रस्य प्रणिधिः अतिथिरूपेण समागतः हिरण्यगर्भदुर्गं प्रति। सः तिरस्कार्यः इति नीतिद्योतनाय श्रृगालकथा आदौ पठ्यते। तत्कथाद्वारा स्वजनं त्यक्त्वा परजनेषु आदरः न कर्तव्यः इति नीतिः बोधिता। ततः परं युद्धाय प्रस्थितौ हंसमयूरौ इति युद्धप्रस्तावः आरब्धः। तत्प्रसंगात्

वीरवरस्य कथा हंसेन श्रावितः। तत्कथाद्वारा मध्ये यः आयाति सोऽपि ग्राह्यः इति नीतिः परिस्फुरति। ततः चक्रवाकः राज्ञः हितकरमेव उपदेशः कर्तव्यः न तु प्रीतिकरः इति नीतिद्योतनाय चूडामणिनामकक्षत्रियस्य कथां श्रावितवान्। ततः परं युद्धप्रस्ताः विवृतः तत्रापि सारसपक्षिणः कथं हिरण्यगर्भं रक्षितवन्तः इति प्रदर्शयति। ततः परं काकः हिरण्यगर्भस्य दुर्गे अग्निं निक्षिप्तवानिति उक्त्वा हिरण्यगर्भः छलेन पराजितः इति विग्रहं समापयामास।

**तृतीयः खण्डः – (सन्धिः) पुनः कथारम्भकाले राजपुत्रैरुक्तम् इत्यारभ्य नष्टौ तुल्यबलौ न किम् इति पर्यन्तम्।**

विग्रहः समाप्ते सति राजपुत्राः सन्धिं प्रार्थितवन्तः। तदर्थं विष्णुशर्मा सन्धिं श्रावयामास। तथाहि- युद्धे पराजयानन्तरं खिन्नमनाः राजहंसाः बभूवुः – केन दुर्गे अग्निः निक्षिप्तः इति। तस्य उत्तरं ददाति चक्रवाकः- काकः इति। तज्ज्ञात्वा दैवं निन्दति हंसः। ततः परं किं कर्तव्यमिति पृष्टे चक्रवाकः सन्धिः कार्यः इति उपदेशं कृतवान्। तत्र प्रथमा कथा भवति संकटविकटयोः कथा। अनय कथया यः बुद्धिमतः वाक्यं न श्रृणोति सः दुर्गतिमेव प्राप्नोतीति नीतिः द्योत्यते। तत्रैव अवान्तरकथा भवति प्रतुत्पन्नमतिरूपमत्स्यत्रयस्य कथा भवति। तया कथया आपत्कालेपि बुद्धिचातुर्यमेव उपकरोति इति नीतिः द्योतिता। ततः परं समुद्रदत्तस्य कथा भवति । अनया कथया आपत्कालेपि भयं त्यक्त्वा चातुर्येण कार्ये कृते साफल्यं भवति इति नीतिः ज्ञायते । ततः परं गृद्धकूटपर्वते विद्यमानानां बकानां कथा तया कथया यः उपायं पश्यति सः अपायमपि जानीयात् इति नीतिः ज्ञायते ।

**चतुर्थः खण्डः – पुरा दैत्यौ सहोदरौ इत्यारभ्य मेघवर्णः कथयति इति पर्यन्तम्।**

युद्धे अधिकबलेन न योद्धव्यं तथा समबलेनापि न योद्धव्यमिति मन्त्रिणा उक्तम् । तत्र संदिह्य राजा आह समबलेन कुतो न योद्धव्यमिति । तदर्थं मन्त्री सुन्दोपसुन्दरूपदैत्यभ्रात्रोः कथां श्रावयामास । तया कथया समबलावपि उभौ युद्धे नष्टौ जातौ इति उक्त्वा तथा युद्धः न कर्तव्यः इति नीतिः बोधिता । एतत्कथां

श्रुत्वा राजा दुःखेन अपृच्छत् किमर्थमिदं पूर्वमेव भवति नोपदिष्टमिति । तच्छ्रुत्वा मन्दहासेन मन्त्री अकथयत्- मद्वाक्यं भवता पूर्वं न श्रुतम् अत एव इयं दशा भवताम् इति। एवं गृध्रमयूरसंवादः तथा हंसचक्रवाकयोः संवादश्च बहुधा अभूत् । तत्रैव असन्धेयाः के इत्यपि दर्शिताः। ततः परं मेघवर्णः ब्राह्मणकथां श्रावयामास । पण्डितोपि ब्राह्मणः कथं धूर्तवचसा मूर्खतां प्राप्य अजां त्यक्तवानिति न्यायमुक्त्वा एवमेव प्रकारेण मद्वाक्ये श्रद्धां दत्त्वा हिरण्यगर्भोपि नष्टः इति मेघवर्णः अकथयत् ।

**पञ्चमः खण्डः – अस्ति जीर्णोद्याने मन्दविषो इत्यारभ्य सन्धिर्नाम चतुर्थः कथासङ्ग्रहः इत्यन्तपर्यन्तम्**

अन्तिमे खण्डे आदौ मन्दमतिनामकसर्पस्य कथा भवति। इयं कथा मेघवर्णेन श्राविता भवति । तत्र स्वकार्यसिद्धये शत्रूनपि वहेत् इति नीतिः प्रदर्शिता। अतः मत्कार्यसिद्ध्यर्थं सर्वं सोढ्वा तत्रासम्।ततः परं कैस्सह सन्धिः न कर्तव्या इति नीतिः श्लोकरूपेण बोधिता। ततः परं सन्धिः कतिविधिः इति द्योतनाय सन्धेः विंशतिप्रकारान् दर्शयामास। ततः सिंहलराजा महाबलो जम्बूद्वीपस्य आक्रमणं कृतवानिति शुकेन श्रावितां कठोरवार्तां श्रुत्वा भीतः मयूरः दूरदर्शिनं पप्रच्छ। ततः दूरदर्शी सन्धये हिरण्यगर्भस्य कुटीरं गतवान्। तं च संयगभ्यर्च्य काञ्चनाभिधानसन्धिमङ्गीचकार। ततः सर्वे स्वराज्यं परिपाल्य सुखेन निवसन्ति स्म इति सन्धिप्रसंगं समापितवान् विष्णुशर्मा। ततः संजातहर्षाः राजापुत्राः अपि कृतज्ञतां विनिवेदितवन्तः इति कथायाः समाप्तिः वर्णिता।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| खण्ड-1 | (विग्रहः) अथ पुनः कथारम्भकाले राजपुत्रा इत्यारभ्य नीलवर्णश्रृगालवदिति पर्यन्तम्। | 8-30 |
| खण्ड-2 | अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया इत्यारभ्य विग्रहो नाम तृतीयाकथासङ्ग्रहः इत्यन्तपर्यन्तम् | 31-58 |
| खण्ड-3 | (सन्धिः) पुनः कथारम्भकाले राजपुत्रैरुक्तम् इत्यारभ्य नष्टौ तुल्यबलौ न किम् इति पर्यन्तम्। | 59-73 |
| खण्ड-4 | पुरा दैत्यौ सहोदरौ इत्यारभ्य मेघवर्णः कथयति इति पर्यन्तम्। | 74-88 |
| खण्ड-5 | अस्ति जीर्णोद्याने मन्दविषो इत्यारभ्य सन्धिर्नाम चतुर्थः कथासङ्ग्रहः इत्यन्तपर्यन्तम् | 89-107 |

# हितोपदेशम्- 2

## (विग्रहः सन्धिश्च)

### खण्डः 1

**पाठरचना**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

**प्रस्तावना**

हितोपदेशम् इति ग्रन्थः संस्कृतभाषायां सकलनीतीनां सङ्ग्रहात्मकः तादृशनीतीनां कथारूपेण प्रतिपादकः छात्रोपयोगी ग्रन्थः। अस्मिन्ग्रन्थे नीतयः याः सन्ति ताः महाभारतादिग्रन्थेभ्यः तथा काव्येभ्यः एवं चाणक्यादिनीत्यादिग्रन्थेभ्यश्च सङ्गृहीताः सन्ति। हिताय उपदेशः हितोपदेशः, हितोपदेशः विद्यते यत्र तत् हितोपदेशम् इति अस्य नाम्नः विग्रहः। अयं ग्रन्थः चतुर्धा विभिक्तः यथा – मित्रलाभः,सुहृद्भेदः,विग्रहः,सन्धिः चेति। अस्मिन् पत्रे विषयौ भवतः विग्रहसन्धी एव अत अत्र

प्रथमखण्डे विग्रहात् काश्चन कथाः बोध्यन्ते। तत्र आदौ ग्रन्थस्य मङ्गलाचरणं ततः विग्रहस्य प्रधानकथा आरब्धा। प्रधानकथा भवति कर्पूरद्वीपस्थहिरण्यगर्भनामकहंसेन सह जम्बूद्वीपस्थमयूरराज्ञः चित्रवर्णस्य युद्धः। तत्प्रसंगात् बह्व्यः कथाः प्रतिपादिताः। तत्र प्रथमा कथा भवति पक्षिवानरकथा। तया कथया विदुषामेव उपदेशः कर्तव्यः नतु मूर्खाणामिति नीतिः बोधिता। ततः रजकस्य गर्दभकथा भवति । तत्र स्ववाचैव मूर्खो विनश्यति इति नीतिं बोधयति ग्रन्थकारः। ततः गजयूथशशिनः कथा भवति। तत्र अधिकबलवत्पुरुषादरः कार्यकरः इति नीतिं द्योतयति। ततः दुर्जनेन न स्थातव्यं न गन्तव्यमिति नीतिद्योतनाय हंसकाककथा काकवर्तककथा च प्रतिपादितौ। ततः रथकारकथा भवति तत्र च प्रत्यक्षेऽपि दोषे दृष्टे मूर्खः सान्त्वेन तुष्यति इति नीतिः बोधिता।

**उद्देश्यम्**

- सरलया रीत्या छात्राणां संस्कृतभाषाज्ञानं जायते।
- विग्रहसंबद्धनीतयः पाठ्यन्ते।
- विग्रहस्य स्वरूपं माहात्म्यं च ज्ञातुं शक्यते।
- विभिन्नशब्दानां परिचयो भवति।
- विभिन्नदेशानां ज्ञानं जायते।

अथ पुनः कथारम्भकाले राजपुत्रा ऊचुः- आर्य! राजपुत्रा वयम् । तद् विग्रहं श्रोतुं नः कुतूहलमस्ति । विष्णुशर्मणोक्तम्-यदेवं भवद्भ्यो रोचते तत् कथयामि । विग्रहः श्रूयतां।

यस्यायमाद्यः श्लोकः-

हंसैः सह मयूराणां विग्रहे तुल्य-विक्रमे ।

विश्वास्य वञ्चिता हंसाः काकैः स्थित्वारिमन्दिरे ॥ ३।१ ॥

राजपुत्रा ऊचुः-कथम् एतत् ?

विष्णुशर्मा कथयति-

## ३-०१ प्रस्तावना कथा

हंसैः सह मयूराणां विग्रहे तुल्य-विक्रमे ।

विश्वास्य वञ्चिता हंसाः काकैः स्थित्वारि-मन्दिरे ॥ ३।१ ॥

अस्ति कर्पूरद्वीपे पद्मकेलि-नामधेयं सरः । तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति । स च सर्वैःजलचरैः पक्षिभिःमिलित्वा पक्षि-राज्येऽभिषिक्तः ।

यतः-

यदि न स्यान्नरपतिः सम्यङ्-नेता ततः प्रजा ।

अकर्ण-धारा जलधौ विप्लवेतेह नौःइव ॥ ३।२ ॥

अपरं च-

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम् ।

वर्धनाद् रक्षणं श्रेयस्तद्-अभावे सदप्यसत् ॥ ३।३ ॥

एकदासौ राजहंसैः सुविस्तीर्ण-कमल-पर्यङ्के सुखासीनः परिवार-परिवृतस् तिष्ठति । ततः कुतश्चिद् देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः । राजोवाच- दीर्घमुख! दशान्तरादागतोऽसि । वार्तां कथय ।

स ब्रूते- देव ! अस्ति महती वार्ता । तामाख्यातुकाम एव सत्वरमागतोऽहम् । श्रूयताम्- अस्ति जम्बूद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति । तस्यानुचरैश्चरद्भिः पक्षिभिःअहं दग्धारच्य-मध्ये चरन्नवलोकितः । पृष्टश्च-कस्त्वम् ? कुतः समागतोऽसि ?

तदा मयोक्तम्-कर्पूरद्वीपस्य राजचक्रवर्तिनो हिरण्यगर्भस्य जहंसस्यानुचरो ऽहं, कौतुकाद् देशान्तरं द्रष्टुमागतोऽस्मि। एतच् छ्रुत्वा पक्षिभिःउक्तम्-अनयोःदेशयोः को देशो भद्रतरो राजा च ?

ततो मयोक्तम्- आः किम् एवम् उच्यते महदन्तरम्। यतः कर्पूरद्वीपः स्वर्ग एव। राजहंसश्च द्वितीयः स्वर्गपतिः कथं वर्णयितुं शक्यते। अत्र मरुस्थले पतिता यूयं किं कुरुथ। अस्मद्देशे गम्यताम्।
ततोऽस्मद्-वचनमाकर्ण्य सर्व-पक्षिणः सकोपा बभूवुः।
तथा चोक्तम्-
पयः-पानं भुजङ्गानां केवलं विष-वर्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ ३।४ ॥
अन्यच्च-
विद्वान् एवोपदेष्टव्यो नाविद्वांस् तु कदाचन।
वानरानुपदिश्याथ स्थान-भ्रष्टा ययुः खगाः ॥ ३।५ ॥

राजोवाच-कथम् एतत् ?
दीर्घमुखः कथयति-
विद्वान् एवोपदेष्टव्यो नाविद्वांस् तु कदाचन।
वानरानुपदिश्याथ स्थान-भ्रष्टा ययुः खगाः ॥ ३।५ ॥

अस्ति नर्मदा-तीरे पर्वतोपत्यकायां विशालः शाल्मली-तरुः। तत्र निर्मित-नीड-कोडे पक्षिणः सुखेन निवसन्ति। अथैकदा वर्षासु नीलपटैःइव जलधर-पटलैःआवृते नभस्-तले। धारासारैःमहती वृष्टिःबभूव। ततो वानरांश्च तरु-तलेऽवस्थितान् शीताकुलान् कम्पमानान् अवलोक्य, कृपया पक्षिभिःउक्तम्-भो भो वानराः !

श्रृणुत-

अस्माभिःनिर्मिता नीडाश्चञ्चु-मात्राहृतैस् तृणैः ।

हस्त-पादादि-संयुक्ता यूयं किमवसीदथ ॥ ३।६ ॥

तच्छ्रुत्वा वानरैःजातामर्षैःआलोचितम्-अहो ! निर्वात-नीड-गर्भावस्थिताः सुखिनः पक्षिणोऽस्मान् निन्दन्ति । तद् भवतु तावद् वृष्टेःउपशमः ।अनन्तरं शान्ते पानीय-वर्षे तैःवानरैःवृक्षमारुह्य, सर्वे नीडा भग्नाः, तेषामण्डानि चाधः पातितानि ।

अतोऽहं ब्रवीमि विद्वान् एवोपदेष्टव्यः इत्यादि ।

राजोवाच- ततस्तैः पक्षिभिः किं कृतम् ?

बकः कथयति- ततस्तैः पक्षिभिः कोपादुक्तम् केनासौ राजहंसो राजा कृतः ?

ततो मयोपजातकोपेनोक्तम्- अयं युष्मदीयो मयूरः केन राजा कृतः ?एतच्छ्रुत्वा ते पक्षिणो मां हन्तुम् उद्यताः । ततो मयापि स्वविक्रमो दर्शितः ।

यतः-

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।

पराक्रमः परिभवे वैयात्यं सुरतेष्व् इव ॥ ३।७ ॥

राजा विहस्याह-

आत्मनश्च परेषां च यः समीक्ष्य बलाबलम् ।

अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः ॥ ३।८ ॥

सुचिरं हि चरन् नित्यं क्षेत्रे सत्यमबुद्धिमान् ।

द्वीपि-चर्म-परिच्छन्नो वाग्-दोषाद् गर्दभो हतः ॥ ३।९ ॥

बकः पृच्छति-कथम् एतत् ?

राजा कथयति-

सुचिरं हि चरन् नित्यं क्षेत्रे सत्यमबुद्धिमान् ।
द्वीपि-चर्म-परिच्छन्नो वाग्-दोषाद् गर्दभो हतः ॥ ३।९ ॥

अस्ति हस्तिनापुरे विलासो नाम रजकः । तस्य गर्दभो ऽतिभार-वहनाद् दुर्बलो मुमूर्षुःइवाभवत् । ततस् तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यक-समीपे सस्य-क्षेत्रे विमुक्तः । ततो दूरात् तमवलोक्य व्याघ्र-बुद्ध्या क्षेत्र-पतयः सत्वरं पलायन्ते ।

अथैकदा केनापि सस्य-रक्षकेण धूसर-कम्बल-कृत-तनु-त्राणेन धनुष्काण्डं सज्जीकृत्यानत-कायेनैकान्ते स्थितम् । तं च दूराद् दृष्ट्वा गर्दभः पुष्टाङ्गो येथेष्ट-सस्य-भक्षण-जात-बलो गर्दभो ऽयम् इति मत्वोच्चैः शब्दं कुर्वाणस्तद्-अभिमुखं धावितः । ततस् तेन सस्य-रक्षकेण चीत्कार-शब्दाद् गर्दभो ऽयम् इति निश्चित्य, लीलयैव व्यापादितः ।

अतोऽहं ब्रवीमि-सुचिरं हि चरन्नित्यम् इत्यादि ॥

## ३-०२ दीर्घमुखदौत्यम्

दीर्घमुखो ब्रूते-ततः पश्चात् तैः पक्षिभिःउक्तम्-अरे पापा दुष्ट-बक ! अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि । तन्न क्षन्तव्यम् इदानीम् । इत्युक्त्वा सर्वे मां चञ्चुभिःहत्वा, स-कोपा ऊचुः-पश्य रे मूर्ख ! स हंसस्तव राजा सर्वथा मृदुः । तस्य

राज्याधिकारो नास्ति । यत एकान्त-मृदुः करतलस्थमप्यर्थं रक्षितुमक्षमः । स कथं पृथिवीं शास्ति ? राज्यं वा तस्य किम् ? त्वं च कूपमण्डूकः । तेन तद्-आश्रयम् उपदिशसि ।

शृणु-

सेवितव्यो महा-वृक्षः फल-च्छाया-समन्वितः ।
यदि दैवात् फलं नास्ति च्छाया केन निवार्यते ॥ ३।१० ॥

अन्यच्च-

हीन-सेवा न कर्तव्या कर्तव्यो महदाश्रयः ।

पयो ऽपि शौण्डिकी-हस्ते वारुणीत्यभिधीयते ॥ ३।११ ॥

अन्यच्च-

महान् अप्यल्पतां याति निर्गुणे गुण-विस्तरः ।

आधाराधेय-भावेन गजेन्द्र इव दर्पणे ॥ ३।१२ ॥

किन्तु-

अजा सिंह-प्रसादेन वने चरति निर्भयम् ।

राममासाद्य लङ्कायां लेभे राज्यं विभीषणः ॥ ३।१३ ॥

विशेषतश्च-

व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे ।

शशिनो व्यपदेशेन शशकाः सुखमासते ॥ ३।१४ ॥

मयोक्तम्-कथम् एतत् ?

पक्षिणः कथयन्ति-

व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे ।

शशिनो व्यपदेशेन शशकाः सुखमासते ॥ ३।१४ ॥

कदाचिद् वर्षास्वपि वृष्टेःअभावात् तृषार्तो गज-यूथो यूथपतिमाह-नाथ ! कोऽभ्युपायो ऽस्माकं जीवनाय ? नास्ति क्षुद्र-जन्तूनां अपि निमज्जन-स्थानम् । वयं च निमज्जन-स्थानाभावान् मृताः । अन्धा इव किं कुर्मः ? क्व यामः ? ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं दर्शितवान् । ततो दिनेषु गच्छत्सु तत्-तीरावस्थिताः क्षुद्र-शशका गज-पादाहतिभिश् चूर्णिताः । अनन्तरं शिलीमुखो नाम शशकश् चिन्तयामास- अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागन्तव्यम् । ततो विनष्टमस्मत्कुलम् ।

ततो विजयो नाम वृद्धशशकोऽवदत्-मा विषीदत । मयात्र प्रतीकारः कर्तव्यः । ततोऽसौ प्रतिज्ञाय चलितः। गच्छता च तेनालोचितम्-कथं मया गज-यूथ-नाथ-समीपे स्थित्वा वक्तव्यम् ।

यतः-

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥ ३।१५ ॥

अतोऽहं पर्वतशिखरमारुह्य यूथनाथं संवादयामि । तथानुष्ठिते सति यूथनाथ उवाच- कस्त्वम् ? कुतः समायातः ? स ब्रूते-शशकोऽहम् । भगवता चन्द्रेण भवद्-अन्तिकं प्रेषितः ।
यूथपतिःआह- कार्यम् उच्यताम् ।

विजयो ब्रूते-

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
सदैवावध्य-भावेन यथार्थस्य हि वाचकः ॥ ३।१६ ॥

तदहं तद्-आज्ञया ब्रवीमि, शृणु । यदेते चन्द्रसरो-रक्षकाः शशकास्त्वया निःसारितास्तदनुचितं कृतम् । ते शशकाश् चिरमस्माकं रक्षिताः । अत एव मे शशाङ्क इति प्रसिद्धिः । एवम् उक्तवति दूते यूथपतिःभयादिदमाह-प्रणिधे ! इदमज्ञानतः कृतम् । पुनःन तत्र गमिष्यामि ।

दूत उवाच-यद्येवं तदत्र सरसि कोपात् कम्पमानं भगवन्तं शशाङ्कं प्रणम्य, प्रसाद्य च गच्छ ।ततस् तेन रात्रौ यूथपतिं नीत्वा, तत्र जले चञ्चलं चन्द्र-बिम्बं दर्शयित्वा स यूथपतिः प्रणामं कारितः । उक्तं च तेन-देव ! अज्ञानादनेनापराधः कृतः । ततः क्षम्यताम् । नैवं वारान्तरं विधास्यते । इत्युक्त्वा प्रस्थापितः ।
अतो वयं ब्रूमः- व्यपदेशेऽपि सिद्धिः स्यात् इति ।

ततो मयोक्तम्- स एवास्मत्प्रभू राजहंसो महा-प्रतापो ऽतिस्मर्थः । त्रैलोक्यस्यापि प्रभुत्वं तत्र युज्यते, किं पुना राज्यम् इति । तदाहं तैः पक्षिभिः-दुष्ट ! कथमस्मद्-भूमौ चरसि इत्यभिधाय राज्ञश् चित्रवर्णस्य समीपं नीतः । ततो राज्ञः पुरो मां प्रदर्श्य तैः प्रणम्योक्तम्-देव ! अवधीयताम् । एष दुष्टोऽस्मद्-देशे चरन्नपि देव-पादान् अधिक्षिपति ।

राजाह- कोऽयम् ? कुतः समायातः ?

ते ऊचुः- हिरण्यगर्भ-नाम्नो राजहंसस्यानुचरः कर्पूरद्वीपादागतः ।

अथाहं गृध्रेण मन्त्रिणा पृष्टः- कस्तत्र मुख्यो मन्त्री ? इति ।

मयोक्तम्- सर्वशास्त्रार्थपारगः शर्वज्ञो नाम चक्रवाकः ।

गृध्रो ब्रूते- युज्यते । स्वदेशजो ऽसौ ।

यतः-

स्वदेशजं कुलाचार-विशुद्धम् उपधाशुचिम् ।

मन्त्रज्ञमवसनिनं व्यभिचार-विवर्जितम् ॥ ३।१७ ॥

अधीत-व्यवहारार्थं मौलं ख्यातं विपश्चितम् ।

अर्थस्योत्पादकं चैव विदध्यान् मन्त्रिणं नृपः ॥ ३।१८ ॥

अत्रान्तरे शुकेनोक्तम्-देव ! कर्पूर-द्वीपादयो लघुद्वीपा जम्बूद्वीपान्तर्गता एव । तत्रापि देव-पादानाम् एवाधिपत्यम् । ततो राज्ञाप्युक्तम्-एवम् एव ।

यतः-

राजा मत्तः शिशुश् चैव प्रमदा धन-गर्वितः ।

अप्राप्यमपि वाञ्छन्ति किं पुनःलभ्यतेऽपि यत् ॥ ३।१९ ॥

ततो मयोक्तम्-यदि वचनम्- मात्रेणैवाधिपत्यं सिद्ध्यति । तदा जम्बूद्वीपेऽप्यस्मत् प्रभोःहिरण्यगर्भस्य स्वाम्यमस्ति । शुको ब्रूते-कथमत्र निर्णयः ? मयोक्तं-सङ्ग्राम एव ।

राज्ञा विहस्योक्तम्-स्व-स्वामिनं गत्वा सज्जीकुरु ।

तदा मयोक्तम्-स्व-दूतोऽपि प्रस्थाप्यताम् ।

राजोवाच-कः प्रयास्यति दौत्येन ?

यत एवम्भूतो दूतः कार्यः-

भक्तो गुणी शुचिःदक्षः प्रगल्भो ऽव्यसनी क्षमी ।

ब्राह्मणः परमर्मज्ञो दूतः स्यात् प्रतिभानवान् ॥ ३।२० ॥

गृध्रो वदति-सन्त्य् एव दूता बहवः, किन्तु ब्राह्मण एव कर्तव्यः।

यतः-

प्रसादं कुरुते पत्युः सम्पत्तिं नाभिवाञ्छति ।

कालिमा कालकूटस्य नापैतीश्वर-सङ्गमात् ॥ ३।२१ ॥

राजाह - ततः शुक एव व्रजतु ।शुक !त्वम् एवानेन सह तत्र गत्वास्मद्-अभिलषितं ब्रूहि ।
शुको ब्रूते- यथाज्ञापयति देवः । किन्त्व् अयं दुर्जनो बकः । तदनेन सह न गच्छामि ।

तथा चोक्तम्-

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।

दशाननो ऽहरत् सीतां बन्धनं स्यान् महोदधेः ॥ ३।२२ ॥

अपरं च-

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।

काक-सङ्गाद् धतो हंसस् तिष्ठन् गछंश्च वर्तकः ॥ ३।२३ ॥

राजोवाच-कथम् एतत् ?

शुकः कथयति-

## ०३-०४ काकहंसयोः कथा

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।

काक-सङ्गाद्धतो हंसस्तिष्ठन् गछंश्च वर्तकः ॥ ३।२३ ॥

अस्त्युज्जयिनी-वर्त्म-प्रान्तरे प्लक्ष-तरुः । तत्र हंस-काकौ निवसतः । कदाचित् ग्रीष्म-समये परिश्रान्तः कश्चित् पथिकस्तत्र तरु-तले धनुष्काण्डं सन्निधाय सुप्तः । तत्र क्षणान्तरे तन्-मुखाद् वृक्ष-च्छायापगता । ततः सूर्य-तेजसा तन्-मुखं व्याप्तमवलोक्य, तद्-वृक्ष-स्थितेन पुण्य-शीलेन शुचिना राजहंसेन कृपया पक्षौ प्रसार्य पुनस्तन्-मुखे छाया कृता । ततो निर्भर-निद्रा-शुखिना पथि-भ्रमण-परिश्रान्तेन पान्थेन मुख-व्यादानं कृतम् ।

अथ परसुखमसहिष्णुः स्वभाव-दौर्जन्येन स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावदसौ पान्थ उत्थायोर्ध्वं निरीक्षते, तावत् तेनावलोकितो हंसः काण्डेन हतो व्यापादितः ।

अतोऽहं ब्रवीमि-न स्थातव्यम् इति ।

देव ! वर्तक- कथामपि कथयामि ।

श्रूयताम्-

## ०३-०४अ काकवर्तकयोः कथा

एकत्र वृक्षे काक-वर्तुकौ सुखं निवसतः । एकदा भगवतो गरुडस्य यात्रा-प्रसङ्गेन सर्वे पक्षिणः समुद्र-तीरं गताः । ततः काकेन सह वर्तकश्चलितः । अथ गच्छतो गोपालस्य मस्तकावस्थित-दधि-

भाण्डाद् वारं वारं तेन काकेन दधि खाद्यते । ततो यावदसौ दधि-भाण्डं भूमौ निधायोर्ध्वमवलोकते, तावत् तेन काक-वर्तकौ दृष्टौ । ततस् तेन दृष्टः काकः पलायितः । वर्तकः स्वभाव-निरपराधो मन्द-गतिस् तेन प्राप्तो व्यापादितः ।

अतोऽहं ब्रवीमि-न गन्तव्यम् इत्यादि ।

ततो मयोक्तम्-भ्रातः शुक ! किम् एवं ब्रवीषि ? मां प्रति यथा श्रीमद्-देव-पादास्तथा भवान् अपि ।

शुकेनोक्तम्-अस्त्व् एवम् । किन्तु,

दुर्जनैःउच्यमानानि सम्मतानि प्रियाण्य् अपि ।
अकाल-कुसुमानीव भयं सञ्जनयन्ति हि ॥ ३।२४ ॥

दुर्जनत्वं च भवतो वाक्यादेव ज्ञातम् । यदनयोःभूपालयोःविग्रहे भवद्-वचनम् एव निदानम् ।

पश्य-

प्रत्यक्षेऽपि कृते दोषे मूर्खः सान्त्वेन तुष्यति ।
रथ-कारो निजां भार्यां सजारां शिरसाकरोत् ॥ ३।२५ ॥

राज्ञोक्तम्-कथम् एतत् ?

शुकः कथयति-

## ०३-०५ मन्दमतिरथकारस्य कथा

प्रत्यक्षेऽपि कृते दोषे मूर्खः सान्त्वेन तुष्यति ।
रथ-कारो निजां भार्यां सजारां शिरसाकरोत् ॥ ३।२५ ॥

अस्ति यौवन-श्री-नगरे मन्द-मतिःनाम रथकारः । स च स्व-भार्यां बन्धकीं जानाति । किन्तु जारेण समं स्व-चक्षुषा नैक-स्थाने पश्यति । ततोऽसौ रथकारः अहमन्यं ग्रामं गच्छामीत्युक्त्वा चलितः । स कियद्

दूरं गत्वा पुनःआगत्य पर्यङ्क-तले स्व-गृहे निभृतं स्थितः । अथ रथकारो ग्रामान्तरं गत इत्युपजात-विश्वासः स जारः सन्ध्या-काल एवागतः । पxचात् तेन जारेण समं तस्मिन् पर्यङ्के निर्भरं क्रीडन्ती, पर्यङ्क-तल-स्थितस्य भर्तुः किञ्चिदङ्ग-स्पर्शात् स्वामिनं मायाविनं विज्ञाय, मनसि सा विषण्णाभवत् ।ततो जारेणोक्तम्-किम् इति त्वमद्य मया सह निर्भरं न रमसे ? विस्मितेव प्रतिभासि मे त्वम् ।

अथ तयोक्तम्- अनभिज्ञोऽसि । योऽसौ मम प्राणेश्वरो, येन ममाकौमारं सख्यं सो ऽद्य ग्रामान्तरं गतः । तेन विना सकल-जन-पूर्णो ऽपि ग्रामो मां प्रत्यरण्यवत् प्रतिभाति । किं भावि ? तत्र पर-स्थाने किं खादितवान् ? कथं वा प्रसुप्तः ? इत्यस्मद्धृदयं विदीर्यते ।

जारो ब्रूते- तव किम् एवंविधा स्नेह-भूमी रथकारः ?

बन्धक्य् अवदत्- रे बर्बर ! किं वदसि ?

शृणु-

परुषाण्य् अपि या प्रोक्ता दृष्टा या क्रोध-चक्षुषा ।

सुप्रसन्न-मुखी भर्तुः सा नारी धर्म-भाजनम् ॥ ३।२६ ॥

अपरं च-

नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः ।

यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ ३।२७ ॥

अन्यच्च-

भर्ता हि परमं नार्या भूषणं भूषणैःविना ।

एषा विरहिता तेन शोभनापि न शोभते ॥ ३।२८ ॥

त्वं च जारः पाप-मतिः, मनो-लौल्यात् पुष्प-ताम्बूल-सदृशः कदाचित् सेव्यसे, कदाचिन्न सेव्यसे च । स च पुनःमे स्वामी , मां विक्रेतुं, देवेभ्यो, ब्राह्मणेभ्यो वा दातुम् ईश्वरः । किं बहुना ? तस्मिन् जीवति जीवामि । तन्मरणे चानुमरणं करिष्यामीति प्रतिज्ञा वर्तते ।

यतः-

तिस्रः कोट्योऽर्ध-कोटी च यानि लोमानि मानवे ।
तावत् कालं वसेत् स्वर्गे भर्तारं यो ऽनुगच्छति ॥ ३।२९ ॥

अन्यच्च-

व्याल-ग्राही यथा व्यालं बलादुद्धरते बिलात् ।
तद्वद् भर्तारमादाय स्वर्ग-लोके महीयते ॥ ३।३० ॥

अपरं च-

चितौ परिष्वज्य विचेतनं पतिं प्रिया हि या मुञ्चति देहमात्मनः ।
कृत्वापि पापं शत-लक्षमप्यसौ पतिं गृहीत्वा सुर-लोकमाप्नुयात् ॥ ३।३१ ॥

यतः-

यस्मै दद्यात् पिता त्व् एनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥ ३।३२ ॥

एतत् सर्वं श्रुत्वा मन्द-मतिः स रथकारः-धन्यो ऽहं यस्येदृशी प्रिय-वादिनी, स्वामि-वत्सला च भार्या इति मनसि निधाय, तां खट्वां स्त्री-पुरुष-सहितां मूर्ध्नि कृत्वा सानन्दं ननर्त ।अतोऽहं ब्रवीमि प्रयक्षेऽपि कृते दोषे इत्यादि ।

अतोऽहं तेन राज्ञा यथा-व्यवहारं सम्पूज्य प्रस्थापितः । शुकोऽपि मम पश्चादागच्छन्नास्ते । एतत् सर्वं परिज्ञाय यथा-कर्तव्यमनुसन्धीयताम् ।

## ३-०३ सर्वज्ञहिरण्यगर्भयोः संवादः

चक्रवाको विहस्याह- देव ! बकेन तावद् देशान्तरमपि गत्वा यथा-शक्ति राज-कार्यमनुष्ठितम् । किन्तु देव स्वभाव एष मूर्खानाम् ।

यतः,

शतं दद्यान्न विवदेदिति विज्ञस्य सम्मतम् ।
विना हेतुमपि द्वन्द्वम् एतन्मूर्खस्य लक्षणम् ॥ ३।३३ ॥

राजाह- अलमनेनातीतोपालम्भनेन । प्रस्तुतमनुसन्धीयताम् ।

चक्रवाको ब्रूते- देव ! विजने ब्रवीमि ।

यतः

वर्णाकारप्रतिध्वानैः नेत्रवक्त्रविकारतः ।
अप्यूहन्ति मनो धीरास्तस्माद् रहसि मन्त्रयेत् ॥ ३।३४ ॥

ततो राजा मन्त्री च तत्र स्थितौ अन्येऽन्यत्र गताः । चक्रवाको ब्रूते-देव ! अहम् एवं जानाम्- कस्याप्यस्मन्-नियोगिनः प्रेरणया बकेनेदमनुष्ठितम् ।

यतः

वैद्यानामातुरः श्रेयान् व्यसनी यो नियोगिनाम् ।
विदुषां जीवनं मूर्खः सद्-वर्णो जीवनं सताम् ॥ ३।३५ ॥

राजाऽब्रवीत्- भवतु, कारणमत्र पश्चान् निरूपणीयम् । सम्प्रति यत् कर्तव्यं तन्निरूप्यताम् । चक्रवाको ब्रूते-देव ! प्रणिधिस्तावत् तत्र प्रहीयताम् । ततस्तद्-अनुष्ठानं बलाबलं च जानीम।

तथा हि-

भवेत् स्व-पर-राष्ट्राणां कार्याकार्यावलोकने ।

चारश्चक्षुःमहीभर्तुःयस्य नास्त्यन्ध एव सः ॥ ३।३६ ॥

स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु । तेनासौ स्वयं तत्रावस्थाय, द्वितीयं तत्रत्य-मन्त्र-कार्यं सुनिभृतं निश्चित्य निगद्य प्रस्थापयति ।

तथा चोक्तं-

तीर्थाश्रम-सुर-स्थाने शास्तर-विज्ञान-हेतुना ।

तपस्वि-व्यञ्जनोपेतैः स्व-चरैः सह संवसेत् ॥ ३।३७ ॥

गूढचारश्च- यो जले स्थले च चरति । ततोऽसावेव बको नियुज्यताम् । एतादृश एव कश्चिद् बको द्वितीयत्वेन प्रयातु । तद्-गृह-लोकाश्च राज-द्वारे तिष्ठन्तु । किन्तु एतदपि सुगुप्तमनुष्ठातव्यम् ।

यतः-

षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्तया ।

इत्यात्मना द्वितीयेन मन्त्रः कार्यो मही-भृता ॥ ३।३८ ॥

पश्य-

मन्त्रभेदे हि ये दोषा भवन्ति पृथिवी-पतेः ।

न शक्यास् ते समाधातुम् इति नीति-विदां मतम् ॥ ३।३९ ॥

राजा विमृश्योवाच-प्राप्तस्तावन् मयोत्तमः प्रतिनिधिः ।

मन्त्री ब्रूते-देव ! सङ्ग्रामे विजयो ऽपि प्राप्तः ।

अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच-देव ! जम्बूद्वीपादागतो द्वारि शुकस् तिष्ठति ।

राजा चक्रवाकमालोकते । चक्रवाकेनोक्तम्-कृतावासे तावद् गत्वा तिष्ठतु, पश्चादानीय द्रष्टव्यः ।

यथाज्ञापयति देवः इत्यभिधाय प्रतीहारः शुकं गृहीत्वा तमावास-स्थानं गतः । राजाह-विग्रहस्तावत् समुपस्थितः ।

चक्रवाको ब्रूते-देव ! तथापि प्राग् एव विग्रहो न विधिः ।

यतः-

स किं भृत्यः स किं मन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्व-भू-त्यागं निर्दिशत्यविचारितम् ॥ ३।४० ॥

अपरं च-

विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ।
अनित्यो विजयो यस्माद् दृश्यते युध्यमानयोः ॥ ३।४१।

अन्यच्च-

साम्ना दानेन भेदेन समस्तैःअथवा पृथक् ।
साधितुं प्रयतेतारीन्न युद्धेन कदाचन ॥ ३।४२ ॥

अपरं च-

सर्व एव जनः शूरो ह्यनासादित-विग्रहः ।
अदृष्ट-पर-सामर्थ्यः स-दर्पः को भवेन्न हि ॥ ३।४३ ॥

किं च-

न तथोत्थाप्यते ग्रावा प्राणिभिःदारुणा यथा ।
अल्पोपायान् महा-सिद्धिःएतन्-मन्त्र-फलं महत् ॥ ३।४४ ॥

किन्तु विग्रहम् उपस्थितं विलोक्य व्यवह्रियताम् ।

यतः-

यथा काल-कृतोद्योगात् कृषिः फलवती भवेत् ।
तद्वन् नीतिःइयं देव चिरात् फलति न क्षणात् ॥ ३।४५ ॥

अपरं च-

दूरे भीरुत्वमासन्ने शूरता महतो गुणः ।
विपत्तौ हि महान् लोके धीरत्वमधिगच्छति ॥ ३।४६ ॥

अन्यच्च-

प्रत्यूहः सर्व-सिद्धीनाम् उत्तापः प्रथमः किल ।
अतिशीतलमप्यम्भः किं भिनत्ति न भूभृतः ॥ ३।४७ ॥
बलिना सह योद्धव्यम् इति नास्ति निदर्शनम् ।
तद् युद्धं हस्तिना सार्धं नराणां मृत्युमावहेत् ॥ ३।४८ ॥

अन्यच्च-

स मूर्खः कालमप्राप्य यो ऽपकर्तरि वर्तते ।
कलिःबलवता सार्धं कीट-पक्षोद्गमो यथा ॥ ३।४९ ॥

किं च-

कौर्मं सङ्कोचमास्थाय प्रहारमपि मर्षयेत् ।
प्राप्त-काले तु नीतिज्ञ उत्तिष्ठेत् क्रूर-सर्पवत् ॥ ३।५० ॥
महत्यल्पेऽप्युपायज्ञः समम् एव भवेत् क्षमः ।
समुन्मूलयितुं वृक्षांस् तृणानीव नदीरयः ॥ ३।५१ ॥

अतो दूतोऽयं शुकोऽत्राश्वास्य तावद् ध्रियतां यावद् दुर्गं सज्जीक्रियते,

यतः-
एकः शतं योधयति प्राकार-स्थो धनुर्धरः ।
शतं शत-सहस्राणि तस्माद् दुर्गं विशिष्यते ॥ ३।५२ ॥

किं च-
अदुर्ग-विषयः कस्य नारेः परिभवास्पदम् ।
अदुर्गो ऽनाश्रयो राजा पोत-च्युत-मनुष्यवत् ॥ ३।५३ ॥
दुर्गं कुर्यान् महाखातम् उच्च-प्राकार-संयुतम् ।
स-यन्त्रं स-जलं शैल-सरिन्-मरु-वनाश्रयम् ॥ ३।५४ ॥
विस्तीर्णताति-वैषम्यं रस-धान्येध्म-सङ्ग्रहः ।
प्रवेशश् चाप-सारश्च सप्तैता दुर्ग-सम्पदः ॥ ३।५५ ॥

राजाह-दुर्गानुसन्धाने को नियुज्यताम् ?
चक्रवाको ब्रूते-

यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत् ।
कर्मस्वदृष्ट-कर्मा यः शास्त्रज्ञो ऽपि विमुह्यति ॥ ३।५६ ॥

तदाहूयतां सारसः । तथानुष्ठिते सति समागतं सारसमवलोक्य राजोवाच-भोः सारस ! त्वं सत्वरं दुर्गमनुसन्धेहि ।

सारसः प्रणम्योवाच-देव ! दुर्गं तावदिदम् एव चिरात् सुनिरूपितमास्ते महत् सरः । किन्त्व् एतन्-मध्य-द्वीपे द्रव्य-सङ्ग्रहः क्रियताम् ।

यतः-

धान्यानां सङ्ग्रहो राजन् उत्तमः सर्व-सङ्ग्रहात् ।
निक्षिप्तं हि मुखे रत्नं न कुर्यात् प्राण-धारणम् ॥ ३।५७ ॥

किं च-

ख्यातः सर्व-रसानां हि लवणो रस उत्तमः ।
गृह्णीयात् तं विना तेन व्यञ्जनं गोमयायते ॥ ३।५८ ॥

राजाह- सत्वरं गत्वा सर्वमनुष्ठीयताम् ।पुनः प्रविश्य प्रतीहारो ब्रूते-देव ! सिंहल-द्वीपादागतो मेघवर्णो नाम वायसः सपरिवारो द्वारि वर्तते । स च देव-पादान् द्रष्टुम् इच्छति ।

राजाह- काकः प्राज्ञो बहुदृश्वा च तद् भवति स सङ्ग्राह्यः ।

चक्रवाको ब्रूते- देव ! अस्त्येवं । किन्तु अस्मद्-विपक्षः काकः स्थलचरः । तेनास्मद्-विपक्ष-पक्षे नियुक्तः कथं सङ्गृह्यते ?

तथा चोक्तम्-

आत्म-पक्षं परित्यज्य पर-पक्षेषु यो रतः ।
स परैःहन्यते मूढो नील-वर्ण-श्रृगालवत् ॥ ३।५९ ॥

राजोवाच– कथम् एतत् ?
मन्त्री कथयति-

## सारांशः

मित्रलाभसुहृद्भेदौ ज्ञात्वा राजपुत्राः विग्रहं प्रार्थयामासुः । अतः विष्णुशर्मा विग्रहनीतिं बोधयितुं कथां श्रावयितुमारम्भम् अकरोत् । तत्र प्रधानकथा भवति कर्पूरद्वीपस्य राज्ञः हिरण्यगर्भनामकस्य हंसस्य तथा जम्बूद्वीपस्थस्य चित्रवर्णनामकस्य राज्ञः मयूरस्य कथा ।

कर्पूरद्वीपे हिरण्यगर्भस्य सर्वे जलचराः राज्याभिषेकं कृतवन्तः तस्य भृत्यः आसीत् दीर्घमुखो नाम बकः । सः जम्बूद्वीपमटित्वा पुनः अत्र समायातः । अत्र आगत्य जम्बूद्वीपस्य वृत्तान्तं श्रावितवान् । बकः तत्रत्यजनैः सह वार्तालापं कृतवान् । तदानीं ते कर्पूरराज्यविषये हिरण्यगर्भविषये च अपृच्छन् । तेषामुत्तरं दातुं दीर्घमुखः – "अस्मद्राजा द्वितीयः इन्द्रः । कर्पूरद्वीपः स्वर्ग एव" इति शशंस । एवमेव पुरस्स्थितान् निन्दति स्म । तेन कोपाविष्टाः स्थलचरपक्षिणः दीर्घमुखं निन्दन्ति ।

अतः दीर्घमुखः अचिन्तयत् विदुषामेव उपदेशः कार्यः न तु मूर्खाणामिति । तदर्थं कथा भवति पक्षिवानराणाम् कथा ।

नर्मदानदीतीरे विशालः शाल्मली वृक्षः आसीत् । तत्र पक्षिणः नीडं निर्माय निवसन्ति स्म । वृष्टिसमये वानराः तत्र समागताः तान् दृष्ट्वा वयं हस्तरहिताः अपि गृहं निर्मितवन्तः भवन्तः अपि निर्माणं कुर्वन्तु इति उपदेशं कृतवन्तः । तच्छ्रुत्वा मूर्खाः कपयः पक्षिनीडान् सर्वान् नाशितवन्तः ।

ततः परम् रजकस्य विलासनामकस्य गर्दभः आसीत् तस्य गर्दभस्य कथा । कदाचित् अलसः गर्दभः भारं वोढुमसमर्थः मुमूर्षुरिव अभवत् । ततः परं तं व्याघ्रचर्मणा प्रच्छाय सस्यक्षेत्रे नियुक्तः

विलासेन । सर्वे भीताः संजाताः परन्तु गर्दभः स्वस्य कठोरशब्देन लब्धः लगुडताडनेन मृतश्च । अतः वाग्दोषः भयानकः भवति इति सूचितम् ।

ततः परं दीर्घमुखः पुनः स्ववृत्तान्तम् आरब्धवान्। तन्मध्ये शत्रुः अतिबलवानपि चेत् तदपेक्षया अधिकबलवत्पुरुषादरः अस्तीति वचनमात्रं कार्यकरं भवति इति द्योतनाय गजयूथशशानां कथा भवति । तत्र शशाः शशिनः नाम उक्त्वा गजयूथात् रक्षिताः भवन्ति ।

ततः जम्बूद्वीपे मयूरराजस्य गृध्रमन्त्रिणश्च संवादः भवति । तत्र नीतयः अपि प्रोक्ताः तन्मध्ये दुर्जनेन न स्थातव्यमिति नीतिद्योतनाय हंसकाकयोः कथा भवति । उज्जयिनीनगरप्रान्ते प्लक्षवृक्षे हंसः काकश्च निवसतः । कश्चित् पथिकः तत्र आगत्य वृक्षस्य तले सुप्तः । तदानीं काकेन मूत्रोत्सर्जने कृते हंसः व्यापादितः पथिकेन ।

एवमेव दुष्टेन सह न गन्तव्यमिति द्योतनाय वर्तककाकयोः कथा भवति । काकेन दधिभाण्डात् दध्नः भोजने कृते वर्तकः व्यापादितः। अतः दुर्जनेन सह न स्थातव्यं न गन्तव्यमिति नीतिः बोधिता ।

ततः परं रथकारकथा । बन्धकी भार्या जारेण सर्वदा क्रीडति । यदा रथकारेण लब्धा सा तदा स्ववाचः तन्त्रेण दोषात् विमुक्ता । अतः मूर्खः रथकारः तस्याः सान्त्वनवाक्यात् तुष्टः। अतः प्रत्यक्षेऽपि कृते दोषे मूर्खः तुष्यति इति नीतिः बोधिता । ततः दूतनीतयः बोधिताः ।

## बोधप्रश्नाः

1. कर्पूरद्वीपस्य राजा कः ?
2. जम्बूद्वीपस्य राजा कः ?
3. सर्वज्ञः इति कस्य नाम?
4. दुर्जनैः साकं किं न कर्तव्यम्?
5. दूरदर्शी कस्य भृत्यः आसीत्?

## शब्दावली

1. विग्रहः

2. हिरण्यगर्भः
3. दीर्घमुखः
4. रथकारः
5. चित्रवर्णः
6. बन्धकी
7. रजकः

### सन्दर्भग्रन्थः -

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

### सहायकग्रन्थाः –

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

### बोधप्रश्नोत्तराणि –

1. हिरण्यगर्भः इति हंसः
2. चित्रवर्णः इति मयूरः
3. हिरण्यगर्भस्य मन्त्रिणः चक्रवाकस्य
4. न स्थातव्यं न गन्तव्यम्
5. हिरण्यगर्भस्य

### अभ्यासप्रश्नाः

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थीकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः 2

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे मेघवर्णः गृध्रस्य प्रणिधिः अतिथिरूपेण समागतः हिरण्यगर्भदुर्गं प्रति। सः तिरस्कार्यः इति नीतिद्योतनाय श्रृगालकथा आदौ पठ्यते। तत्कथाद्वारा स्वजनं त्यक्त्वा परजनेषु आदरः न कर्तव्यः इति नीतिः बोधिता। ततः परं युद्धाय प्रस्थितौ हंसमयूरौ इति युद्धप्रस्तावः आरब्धः। तत्प्रसंगात् वीरवरस्य कथा हंसेन श्रावितः। तत्कथाद्वारा मध्ये यः आयाति सोऽपि ग्राह्यः इति नीतिः परिस्फुरति। ततः चक्रवाकः राज्ञः हितकरमेव उपदेशः कर्तव्यः न तु प्रीतिकरः इति नीतिद्योतनाय चूडामणिनामकक्षत्रियस्य कथां श्रावितवान्।ततः परं युद्धप्रस्ताः विवृतः तत्रापि सारसपक्षिणः कथं हिरण्यगर्भं रक्षितवन्तः इति प्रदर्शयति। ततः परं काकः हिरण्यगर्भस्य दुर्गे अग्निं निक्षिप्तवानिति उक्त्वा हिरण्यगर्भः छलेन पराजितः इति विग्रहं समापयामास।

## उद्देश्यम्

- वाग्दोषः न कर्तव्यः इति ज्ञानमागच्छति
- युद्धे दूतस्य माहात्म्यं ज्ञायते
- राजकार्यस्य महत्वं बुध्यते
- विभिन्नशब्दानां परिचयो भवति।
- विभिन्नदेशानां ज्ञानं जायते।

### ०३-०६ नीलवर्णश्रृगालकथा

आत्मपक्षं परित्यज्य पर-पक्षेषु यो रतः ।
स परैर्हन्यते मूढो नील-वर्ण-श्रृगालवत् ॥ ३।५९ ॥

अस्त्यरण्ये कश्चित् छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन् नीलीभाण्डे निपतितः । पश्चात् तत उत्थातुमसमर्थः, प्रातःआत्मानं मृतवत् सन्दर्श्य स्थितः । अथ नीली-भाण्ड-स्वामिना मृति इति ज्ञात्वा, तस्मात् समुत्थाप्य, दूरे नीत्वासौ परित्यक्तः । तस्मात् पलायितः । ततोऽसौ वने गत्वा आत्मानं नीलप्वर्णमवलोक्याचिन्तयत्-अहम् इदानीम् उत्तम-वर्णः । तदहं स्वकीयोत्कर्षं किं न साधयामि इत्यालोच्य श्रृगालान् आहूय, तेनोक्तं-अहं भगवत्या वन-देवतया स्व-हस्तेनारण्य-राज्ये सर्वौषधि-रसेनाभिषिक्तः । पश्यन्तु मम वर्णम् । तदद्यारभ्यास्मद्-आज्ञयास्मिन्नरण्ये व्यवहारः कार्यः ।श्रृगालाश्च तं विशिष्टवर्णमवलोक्य, साष्टाङ्ग-पातं प्रणम्योचुः-यथाज्ञापयति देवः इति । अनेनैव क्रमेण सर्वेष्व् अरण्य-वासिष्व् आधिपत्यं तस्य बभूव । ततस् तेन स्वज्ञातिभिःआवृतेनाधिक्यं साधितम् । ततस् तेन व्याघ्र-सिंहादीन् उत्तम-परिजनान् प्राप्य, सदसि श्रृगालान् अवलोक्य लज्जमानेनावज्ञया स्वज्ञातयः सर्वे दूरीकृताः । ततो विषण्णान् श्रृगालान् अवलोक्य केनचिद् वृद्ध-श्रृगालेनैतत् प्रतिज्ञातं-मा विषीदत, यदनेनानीतिज्ञेन वयं मर्मज्ञाः । स्वसमीपात् परिभूतास्तद् यथायं नश्यति तथा विधेयम् । यतोऽमी

व्याघ्रादयो वर्ण-मात्र-विप्रलब्धाः शृगालमज्ञात्वा राजानम् इमं मन्यन्ते । तद् यथायं परिचीयते तथा कुरुत । तत्र चैवमनुष्ठेयम्, यथा वदामि-सर्वे सन्ध्या-समये तत्-सन्निधाने महारावम् एकदैव करिष्यथ । ततस् तं शब्दमाकर्ण्य जाति-स्वभावात् तेनापि शब्दः कर्तव्यः ।

यतः-

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः ।

श्वा यदि क्रियते राजा तत् किं नाश्नात्युपानहम् ॥ ३।६० ॥

ततः शब्दादभिज्ञाय स व्याघ्रेण हन्तव्यः । ततस्तथानुष्ठिते सति तद्वृत्तम् । तथा चोक्तम्-

छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः ।

दहत्यन्तर्गतश् चैव शुष्कं वृक्षम् इवानलः ॥ ३।६१ ॥

अतोऽहं ब्रवीमि-आत्म-पक्षं परित्यज्येत्यादि ।

राजाह- यद्येवं तथापि दृश्यतां तावदयं दूरादागतः । तत्-सङ्ग्रहे विचारः कार्यः ।

चक्रो ब्रूते- देव ! प्रणिधिस्तावत् प्रहितो, दुर्गं च सज्जीकृतम् । अतः शुकोऽप्यानीय प्रस्थाप्यताम् । किन्तु योध-बल-समन्वितो भूत्वा, दूरादेव तमवलोकय ।

यतः-

नन्दं जघान चाणक्यस् तीक्ष्ण-दूत-प्रयोगतः ।

तद् दूरान्तरितं दूतं पश्येद् वीर-समन्वितः ॥ ३।६२ ॥

ततः सभां कृत्वाहूतः शुकः काकश्च । शुकः किञ्चिदुन्नत-शिरा दत्तासने उपविश्य ब्रूते-भो हिरण्यगर्भ ! त्वां महाराजाधिराजः श्रीमच्-चित्रवर्णः समाज्ञापयति-यदि जीवितेन श्रिया वा प्रयोजनमस्ति, तदा सत्वरमागत्यास्मच्-चरणौ प्रणम । नो चेदवस्थातुं स्थानान्तरं परिचिन्तय ।

राजा सकोपमाह- आः, सभायामस्माकं न कोऽपि विद्यते य एनं गलहस्तयति ? तत उत्थाय मेघवर्णो ब्रूते- देव ! आज्ञापय, हन्मि चैनं दुष्ट-शुकम् ।
सर्वज्ञो राजानं काकं च सान्त्वयन् ब्रूते- भद्र ! मा मैवम् ।

शृणु तावत्-
न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति
सत्यं न तद् यच् छलमभ्युपैति ॥ ३।६३ ॥

यतो राजधर्मश्चैषः-
दूतो म्लेच्छो ऽप्यवध्यः स्याद् राजा दूत-मुखो यतः ।
उद्यतेष्व् अपि शस्त्रेषु दूतो वदति नान्यथा ॥ ३।६४ ॥

अन्यच्च-
स्वापकर्षं परोत्कर्षं दूतोक्तैःमन्यते तु कः ।
सदैवावध्य-भावेन दूतः सर्वं हि जल्पति ॥ ३।६५ ॥

ततो राजा काकश्च स्वां प्रकृतिमापन्नौ । शुकोऽप्युत्थाय चलितः । पश्चाच्चक्रवाकेणानीय प्रबोध्य कनकालङ्कारादिकं दत्वा सम्प्रेषितः स्वदेशं ययौ । शुकोऽपि विन्ध्याचलं गत्वा, स्वस्य राजानं चित्रवर्णं प्रणतवान् ।

तं विलोक्य राजोवाच-शुक ! का वार्ता ? कीदृशो ऽसौ देशः ?

शुको ब्रूते- देव ! सङ्क्षेपादियं वार्ता । सम्प्रति युद्धोद्योगः क्रियताम् । देशश्चासौ कर्पूरद्वीपः स्वर्गैकदेशो, राजा च द्वितीयः स्वर्ग-पतिः कथं वर्णयितुं शक्यते । ततः सर्वान् शिष्टान् आहूय राजा मन्त्रयितुम् उपविष्टः । आह च तान्-सम्प्रति कर्तव्ये विग्रहे यथा-कर्तव्यम् उपदेशं ब्रूत । विग्रहः पुनरवश्यं कर्तव्यः ।

तथा चोक्तम्-

असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभृतः ।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गना ॥ ३।६६ ॥

दूरदर्शी नाम गृध्रो मन्त्री ब्रूते- देव ! व्यसनितया विग्रहो न विधिः ।

यतः-

मित्रामात्य-सुहृद्-वर्गा यदा स्युःदृढ-भक्तयः ।
शत्रूणां विपरीताश्च कर्तव्यो विग्रहस्तदा ॥ ३।६७ ॥

अन्यच्च-

भूमिःमित्रं हिरण्यं च विग्रहस्य फलं त्रयम् ।
यदैतन्निश्चितं भावि कर्तव्यो विग्रहस्तदा ॥ ३।६८ ॥

राजाह- मद्बलं तावदवलोकयतु मन्त्री । तदैतेषाम् उपयोगो ज्ञायताम् । एवमाहूयतां मौहूर्तिकः । स यात्रार्थं शुभलग्नं निर्णीय ददातु ।

मन्त्री ब्रूते- देव ! तथापि सहसा यात्रा-करणमनुचितम् ।

यतः-

विशन्ति सहसा मूढा येऽविचार्य द्विषद्-बलम् ।

खड्ग-धारा-परिष्वङ्गं लभन्ते ते सुनिश्चितम् ॥ ३।६९ ॥

राजाह- मन्त्रिन् ! ममोत्साह-भङ्गं सर्वथा मा कृथाः । विजिगीषुःयथा पर-भूमिमाक्रमति तथा कथय ।

गृध्रो ब्रूते- देव ! तत् कथयामि । किन्तु तदनुष्ठितम् एव फल-प्रदम् ।

तथा चोक्तम्-

किं मन्त्रेणाननुष्ठाने शास्त्रवित् पृथिवी-पतेः ।

न ह्य् औषध-परिज्ञानाद् व्याधेः शान्तिः क्वचिद् भवेत् ॥ ३।७० ॥

राजादेशश्चानतिक्रमणीय इति यथाश्रुतं निवेदयामि शृणु- देव !

नद्य्-अद्रि-वन-दुर्गेषु यत्र यत्र भयं नृप ।

तत्र तत्र च सेनानीःयायाद् व्यूहीकृतैःबलैः ॥ ३।७१ ॥

बलाध्यक्षः पुरो यायात् प्रवीर-पुरुषान्वितः ।

मध्ये कलत्रं स्वामी च कोशः फल्गु च यद् बलम् ॥ ३।७२ ॥

पार्श्वयोःउभयोःअश्वा अश्वानां पार्श्वतो रथाः ।

रथानां पार्श्वतो नागा नागानां च पदातयः ॥ ३।७३ ॥

पश्चात् सेनापतिःयायात् खिन्नानाश्वासयन् छनैः ।

मन्त्रिभिः सुभटैःयुक्तः प्रतिगृह्य बलं नृपः ॥ ३।७४ ॥

समेयाद् विषमं नागैःजलाढ्यं समहीधरम् ।

सममश्वैःजलं नौभिः सर्वत्रैव पदातिभिः ॥ ३।७५ ॥

हस्तिनां गमनं प्रोक्तं प्रशस्तं जलदागमे ।

तदन्यत्र तुरङ्गाणां पत्तीनां सर्वदैव हि ॥ ३।७६ ॥

शैलेषु दुर्ग-मार्गेषु विधेयं नृप-रक्षणम् ।

स्व-योधै रक्षितस्यापि शयनं योग-निद्रया ॥ ३।७७ ॥

नाशयेत् कर्षयेच् छत्रून् दुर्ग-कण्टक-मर्दनैः ।

पर-देश-प्रवेशे च कुर्यादाटविकान् पुरः ॥ ३।७८ ॥

यत्र राजा तत्र कोशो विना कोशं न राजता ।

सुभटेभ्यस्ततो दद्यात् को हि दातुःन युध्यते ॥ ३।७९ ॥

यतः-

न नरस्य नरो दासो दासस् त्व् अर्थस्य भूपते ।

गौरवं लाघवं वापि धनाधन-निबन्धनम् ॥ ३।८० ॥

अभेदेन च युध्येत रक्षेच् चैव परस्परम् ।

फल्गु सैन्यं च यत् किञ्चिन् मध्ये व्यूहस्य कारयेत् ॥ ३।८१ ॥

पदातींश्च महीपालः पुरो ऽनीकस्य योजयेत् ।

उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ॥ ३।८२ ॥

स्यन्दनाश्वैः समे युध्येदनूपे नौ-द्विपैस्तथा ।
वृक्ष-गुल्मावृते चापैःअसि-चर्मायुधैः स्थले ॥ ३।८३ ॥
दूषयेच् चास्य सततं यवसान् नोदकेन्धनम् ।
भिन्द्याच् चैव तडागानि प्रकारारान् परिखास्तथा ॥ ३।८४ ॥
बलेषु प्रमुखो हस्ती न तथान्यो महीपतेः ।
निजैःअवयवैःएव मातङ्गो ऽष्टायुधः स्मृतः ॥ ३।८५ ॥
बलमश्वश्च सैन्यानां प्राकारो जङ्गमो यतः ।
तस्मादश्वाधिको राजा विजयी स्थल-विग्रहे ॥ ३।८६ ॥

तथा चोक्तम्-
युध्यमाना हयारूढा देवानामपि दुर्जयाः ।
अपि दूरस्थितास् तेषां वैरिणो हस्तवर्त्तिनः ॥ ३।८७ ॥
प्रथमं युद्ध-कारित्वं समस्त-बल-पालनम् ।
दिङ्-मार्गाणां विशोधित्वं पत्ति-कर्म प्रचक्षते ॥ ३।८८ ॥
स्वभाव-शूरमस्त्रज्ञमविरक्तं जित-श्रमम् ।
प्रसिद्ध-क्षत्रिय-प्रायं बलं श्रेष्ठतमं विदुः ॥ ३।८९ ॥
यथा प्रभु-कृतान् मानाद् युध्यन्ते भुवि मानवाः ।
न तथा बहुभिःदत्तैःद्रविणैःअपि भूपते ॥ ३।९० ॥
वरमल्प-बलं सारं न कुर्यान् मुण्ड-मण्डलीम् ।
कुर्यादसार-भङ्गो हि सार-भङ्गमपि स्फुटम् ॥ ३।९१ ॥
अप्रसादो ऽनधिष्ठानं देयांश-हरणं च यत् ।
काल-यापो ऽप्रतीकारस्तद् वैराग्यस्य कारणम् ॥ ३।९२ ॥

अपीडयन् बलं शत्रून् जिगीषुःअभिषेणयेत् ।
सुख-साध्यं द्विषां सैन्यं दीर्घ-प्रयाण-पीडितम् ॥ ३।९३ ॥
दायादादपरो यस्मान् नास्ति भेद-करो द्विषाम् ।
तस्मादुत्थापयेद् यत्नाद् दायादं तस्य विद्विषः ॥ ३।९४ ॥
सन्धाय युवराजेन यदि वा मुख्य-मन्त्रिणा ।
अन्तः-प्रकोपणं कुर्यादभियोक्ता स्थिरात्मनः ॥ ३।९५ ॥
क्रूरामित्रं रणे चापि भङ्गं दत्त्वा विघातयेत् ।
अथवा गो-ग्रहाकृष्ट्या तन्-मुख्याश्रित-बन्धनात् ॥ ३।९६ ॥
स्वराज्यं वासयेद् राजा पर-देशापहरणात् ।
अथवा दान-मानाभ्यां वासितं धनदं हि तत् ॥ ३।९७ ॥

अथवा बहुनोदितेन-
आत्मोदयः पर-ग्लानिःद्वयं नीतिःइतीयती ।
तदूरीकृत्य कृतिभिःवाचस्पत्यं प्रतीयते ॥ ३।९८ ॥

राज्ञा विहस्योक्तम्- सर्वम् एतद् विशेषतश् चोच्यते । किन्तु,

अन्यदुच्छृङ्खलं सत्त्वमन्यच् छास्त्र-नियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्-तिमिरयोः कुतः ॥ ३।९९ ॥

तत उत्थाय राजा मौहूर्तिकावेदित-लग्ने प्रस्थितः । अथ प्रहित-प्रणिधिश्चरो हिरण्यगर्भमागत्य प्रणम्योवाच-देव ! समागत-प्रायो राजा चित्रवर्णः । सम्प्रति मलय-पर्वताधित्यकायां समावासित-कटको

वर्तते । दुर्ग-शोधनं प्रतिक्षणमनुसन्धातव्यम् । यतोऽसौ गृध्रो महामन्त्री । किं च केनचित् सह तस्य विश्वास-कथा-प्रसङ्गेनेतदिङ्गितमवगतं मया । यत्-अनेन कोऽप्यस्मद्-दुर्गे प्राग् एव नियुक्तः ।

चक्रवाको ब्रूते- देव ! काक एवासौ सम्भवति ।

राजाह- न कदाचिदेतत् । यद्येवं तदा कथं तेन शुकस्याभिभवोद्योगः कृतः ? अपरं च, शुकस्यागमनात् तस्य विग्रहोत्साहः । स च चिरादत्रास्ते ।

मन्त्री ब्रूते- तथाप्यागन्तुकः शङ्कनीयः ।

राजाह- आगन्तुका अपि कदाचिदुपकारका दृश्यन्ते ।

शृणु-

परो ऽपि हितवान् बन्धुःबन्धुःअप्यहितः परः ।

अहितो देहजो व्याधिःहितमारण्यम् औषधम् ॥ ३।१०० ॥

अपरं च-

आसीद् वीर-वरो नाम शूद्रकस्य महीभृतः ।

सेवकः स्वल्प-कालेन स ददौ सुतमात्मनः ॥ ३।१०१ ॥

चक्रवाकः पृच्छति–कथम् एतत् ?

राजा कथयति-

## ०३-०७ वीरवरनामसेवककथा

आसीद् वीर-वरो नाम शूद्रकस्य महीभृतः ।

सेवकः स्वल्प-कालेन स ददौ सुतमात्मनः ॥ ३।१०१ ॥

अहं पुरा शूद्रकस्य राज्ञः क्रीडा-सरसि कर्पूरकेलि-नाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवान् अभवम् । वीरवरो नाम राजपुत्रः कुतश्चिद् देशादागत्य राज-द्वारम् उपगम्य प्रतीहारम् उवाच-अहं तावद् वर्तनार्थी राजपुत्रः । मां रज-दर्शनं कारय । ततस् तेनासौ राज-दर्शनं कारितो ब्रूते-देव ! यदि मया सेवकेन प्रयोजनमस्ति, तदास्मद्-वर्तनं क्रियताम् ।

शूद्रक उवाच- किं ते वर्तनम् ?

वीरवरो ब्रूते-प्रत्यहं सुवर्ण-पञ्च-शतानि देहि ।

राजाह-का ते सामग्री ?

वीरवरो ब्रूते-द्वौ बाहू । तृतीयश्च खड्गः ।

राजाह-नैतच् छक्यम् ।

तच्छ्रुत्वा वीरवरः प्रणम्य चलितः । अथ मन्त्रिभिःउक्तम्-देव ! दिन-चतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपम् । किम् उपयुक्तो ऽयम् एतावद् वर्तनं गृह्णाति अनुपयुक्तो वेति ।

ततो मन्त्रि-वचनादाहूय वीरवराय ताम्बूलं दत्त्वा पञ्च-शतानि सुवर्णानि दत्तानि । वर्तन-विनियोगश्च राज्ञा सुनिभृतं निरूपितः । तद्-अर्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यो दत्तम् । स्थितस्यार्धं दुःखितेभ्यः । तदवशिष्टं भोज्य-विलास-व्ययेन । एतत् सर्वं नित्य-कृत्यं कृत्वा, राज-द्वारमहर्निशं खड्ग-पाणिः सेवते । यदा च राजा स्वयं समादिशति तदा स्व-गृहमपि याति ।

अथैकदा कृष्ण- चतुर्दश्यां रात्रौ स राजा स-करुण-क्रन्दन-ध्वनिं शुश्राव । तत् श्रुत्वा राजा ब्रूते-कः कोऽत्र द्वारि तिष्ठति ?

तदा तेनोक्तं- देव ! अहं वीरवरः ।

राजोवाच- क्रन्दनानुसरणं क्रियताम् ।

वीरवरोऽपि- यथाज्ञापयति देवः, इत्युक्त्वा चलितः ।

राज्ञा च चिन्तितम्- अयम् एकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रहितः । नैतदुचितम् । तदहमपि गत्वा किम् एतदिति निरूपयामि ।

ततो राजापि खड्गमादाय तद्-अनुसरण-क्रमेण नगराद् बहिःनिर्जगाम । गत्वा च वीरवरेण रुदती रुप-यौवन-सम्पन्ना सर्वालङ्कार-भूषिता काचित् स्त्री दृष्टा, पृष्टा च-का त्वम् ? किमर्थं रोदिषि ? इति ।

स्त्रियोक्तम्- अहम् एतस्य शूद्रकस्य राज-लक्ष्मीः । चिरादेतस्य भुज-च्छायायां महता सुखेन विश्रान्ता । इदानीमन्यत्र गमिष्यामि ।

वीरवरो ब्रूते- यतापायः सम्भवति, तत्रोपायो ऽप्यस्ति । तत् कथं स्यात् पुनःइहावासो भवत्याः ?

लक्ष्मीः उवाच- यदि त्वमात्मनः पुत्रं शक्तिधरं द्वात्रिंशल्-लक्षणोपेतं भगवत्याः सर्व-मङ्गलाया उपहारीकरोषि, तदाहं पुनःअत्र सुचिरं निवसामि । इत्युक्त्वादृश्याभवत् ।

ततो वीरवरेण स्वगृहं गत्वा निद्रायमाणा स्व-वधूः प्रबोधिता पुत्रश्च । तौ निद्रां परित्यज्योत्थायोपविष्टौ । वीरवरस्तत् सर्वं लक्ष्मीवचनम् उक्तवान् । तच् छ्रुत्वा सानन्दः शक्तिधरो ब्रूते-धन्यो ऽहम् एवम्भूतः । स्वामि-राज्य-रक्षार्थं यस्योपयोगः । तात ! तत् कोऽधुना विलम्बस्य हेतुः ? एवं-विधे कर्मणि देहस्य विनियोगः श्लाघ्यः ।

यतः-

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।

तन्-निमित्तो वरं त्यागो विनाशे नियते सति ॥ ३।१०२ ॥

शक्तिधरमातोवाच - यद्येतन्न कर्तव्यं तत् केनान्येन कर्मणा गृहीतस्य महावर्तनस्य निष्क्रयो भविष्यति । इत्यालोच्य सर्वे सर्वमङ्गलायाः स्थानं गताः । तत्र सर्वमङ्गलां सम्पूज्य वीरवरो ब्रूते-देवि ! प्रसीद । विजयतां शूद्रको महाराजः । गृह्यतामयम् उपहारः । इत्युक्त्वा पुत्रस्य शिरश् चिच्छेद । ततो वीरवरश्चिन्तयामास- गृहीतराजवर्तनस्य निस्तारः कृतः । अधुना निष्पुत्रस्य मे जीवनेनालम् । इत्यालोच्यात्मनः शिरश्चिच्छेद ।

ततः स्त्रियापि स्वामिपुत्रशोकार्तया तदनुष्ठितम् । तत् सर्वं दृष्ट्वा राजा साश्चर्यं चिन्तयामास-

जायन्ते च म्रियन्ते च मद्-विधाः क्षुद्र-जन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ ३।१०३ ॥

तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम् । ततः शूद्रकेणापि स्व-शिरश्छेत्तुं खड्गः समुत्थापितः । अथ भगवत्या सर्वमङ्गलया प्रत्यक्ष-भूतया राजा हस्ते धृतः । उक्तं च- पुत्र ! प्रसन्नोऽस्मि ते, एतावता साहसेनालम् । जीवनान्तेऽपि तव राजभङ्गो नास्ति । राजा च साष्टाङ्गपातं प्रणम्योवाच- देवि ! किं मे राज्येन ? जीवितेन वा मम किं प्रयोजनम् ? यद्यहमनुकम्पनीयस्तदा ममायुः-शेषेणाप्ययं स-दार-पुत्रो वीरवरो जीवतु । अन्यथाहं यथाप्राप्तां गतिं गच्छामि ।
भगवत्युवाच- पुत्र ! अनेन ते सत्त्वोत्कर्षेण भृत्य-वात्सल्येन च सर्वथा सन्तुष्टास्मि । गच्छ विजयी भव । अयमपि स-परिवारो राज-पुत्रो जीवतु । इत्युक्त्वा देव्य् अदृश्याभवत् । ततो वीरवरः स-पुत्र-दारः प्राप्त-जीवनः स्व-गृहं गतः । राजापि तैःअलक्षितः सत्वरमन्तः-पुरं प्रविष्टः ।
अथ प्रभाते वीरवरो द्वारस्थः पुनःभूपालेन पृष्टः सन्नाह- देव ! सा रुदती मामवलोक्यादृश्याभवत् । न काप्यन्या वार्ता विद्यते ।
तद्वचनमाकर्ण्य सन्तुष्टो राजा साश्चर्यं चिन्तयामास- कथमयं श्लाघ्यो महासत्त्वः ?

यतः-
प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्र-वर्षी च प्रगल्भः स्यादनिष्ठुरः ॥ ३।१०४ ॥

एतन्महापुरुष-लक्षणम् एतस्मिन् सर्वमस्ति । ततः स राजा प्रातः शिष्ट-सभां कृत्वा, सर्वं वृत्तान्तं प्रस्तुत्य प्रसादात् तस्मै कर्णाटकराज्यं ददौ ।तत्किमागन्तुको जातिमात्राद् दुष्टः ? तत्राप्युत्तमाधम-मध्यमाः सन्ति ।

चक्रवाको ब्रूते-

योऽकार्यं कार्यवच् छास्ति स किं मन्त्री नृपेच्छया ।

वरं स्वामि-मनो-दुःखं तन्-नाशो न त्व् अकार्यतः ॥ ३।१०५ ॥

वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः ।

शरीर-धर्म-कोशेभ्यः क्षिप्रं स परिहीयते ॥ ३।१०६ ॥

शृणु देव -

पुण्याल् लब्धं यदेकेन तन्ममापि भविष्यति ।

हत्वा भिक्षुं यतो मोहान् निध्य्-अर्थी नापितो हतः ॥ ३।१०७ ॥

राजा पृच्छति–कथम् एतत् ?

मन्त्री कथयति-

## ०३-०८ मूर्खनापितः

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।

हत्वा भिक्षुं यतो मोहान् निध्यर्थी नापितो हतः ॥ ३।१०७ ॥

अस्त्ययोध्यायां पुरि चूडामणिः नाम क्षत्रियः । तेन धनार्थिना महता क्लेशेन भगवांश्चन्द्रार्ध-चूडामणिश् चिरमाराधितः । ततः क्षीणपापोऽसौ स्वप्ने दर्शनं दत्त्वा, भगवद्-आदेशाद्य्-अक्षेश्वरेणादिष्टो यत् त्वमद्य प्रातः क्षौरं कारयित्वा, लगुड-हस्तः सन् स्व-गृह-द्वारि निभृतं स्थास्यसि, ततो यम् एवागतं भिक्षुकं प्राङ्गणे पश्यसि तं निर्दक्षं लगुड-प्रहारेण हनिष्यसि । ततोऽसौ भिक्षुकस्तत्-क्षणात् सुवर्ण-कलसो भविष्यति । तेन त्वया यावज्-जीवं सुखिना भवितव्यम् । ततस्तथानुष्ठिते तद् वृत्तम् ।तत्र क्षौर-करणायानीतेन नापितेन तत् सर्वमालोक्य चिन्तितम्-अये निधि-प्राप्तेःअयम् उपायः । तदहमप्य् एवं किं न करोमि ? ततः प्रभृति स नापितः प्रत्यहं तथाविधो लगुड-हस्तः सुनिभृतं भिक्षोःआगमनं प्रतीक्षते । एकदा तेन प्राप्तो भिक्षुःलगुडेन व्यापादितः । तस्मादपराधात् सो ऽपि नापितो राज-पुरुषैःव्यापादितः ।

अतोऽहं ब्रवीमि-पुण्याल्लब्धं यदेकेन इत्यादि ।

राजाह-

पुरावृत्त-कथोद्गारैः कथं निर्णीयते परः ।

स्यान् निष्कारण-बन्धुःवा किं वा विश्वास-घातकः ॥ ३।१०८ ॥

यातु, प्रस्तुतमनुसन्धीयताम् । मलयाधित्यकायां चेच् चित्रवर्णस्तदधुना किं विधेयम् ? मन्त्री वदति-देव ! आगत-प्रणिधि-मुखान् मया श्रुतं, यत् महा-मन्त्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः ततोऽसौ मूढो जेतुं शक्यः ।

तथा चोक्तम्-

लुब्धः क्रूरो ऽलसो ऽसत्यः प्रमादी भीरुःअस्थिरः ।

मूढो योधावमन्ता च सुख-च्छेद्यो रिपुः स्मृतः ॥ ३।१०९ ॥

ततोऽसौ यावदस्मद् दुर्ग-द्वार-रोधं न करोति, तावन्नद्य्-अद्रि-वन-वर्त्मसु तद्-बलानि हन्तुं सारसादयः सेनापतयो नियुज्यन्ताम् ।

तथा चोक्तम्-

दीर्घ-वर्त्म-परिश्रान्तं नद्य्-अद्रि-वन-सङ्कुलम् ।

घोराग्नि-भय-सन्त्रस्तं क्षुत्-पिपासार्दितं तथा ॥ ३।११० ॥

प्रमत्तं भोजन-व्यग्रं व्याधि-दुर्भिक्ष-पीडितम् ।

असंस्थितमभूयिष्ठं वृष्टि-वात-समाकुलम् ॥ ३।१११ ॥

पङ्क-पांशु-जलाच्छन्नं सुव्यस्तं दस्यु-विद्रुतम् ।

एवम्भूतं महीपालः पर-सैन्यं विघातयेत् ॥ ३।११२ ॥

अन्यच्च-

अवस्कन्द-भयाद् राजा प्रजागर-कृत-श्रमम् ।
दिवा-सुप्तं सदा हन्यान् निद्रा-व्याकुल-सैनिकम् ॥ ३।११३ ॥

अतस्तस्य प्रमादितो बलं गत्वा यथावकाशं दिवा-निशं घ्नन्त्व् अस्मत्-सेनापतयः । तथानुष्ठिते चित्रवर्णस्य सैनिकाः सेनापतयश्च बहवो निहताः । ततश् चित्रवर्णो विषण्णः स्वमन्त्रिणं दूरदर्शिनमाह- तात ! किम् इत्यस्मद्-उपेक्षा क्रियते ? किं क्वाप्यविनयो ममास्ति ?

तथा चोक्तम्-

न राज्यं प्राप्तम् इत्य् एव वर्तितव्यमसाम्प्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपम् इवोत्तमम् ॥ ३।११४ ॥

अपि च-

दक्षः श्रियमधिगच्छति पथ्य् आशी कल्यतां सुखमरोगी ।
उद्युक्तो वियान्तं धर्मार्थ-यशांसि च विनीतः ॥ ३।११५ ॥

गृध्रोऽवदत्-देव !

शृणु-

अविद्वान् अपि भू-पालो विद्या-वृद्धोपसेवया ।
परां श्रियमवाप्नोति जलासन्न-तरुःयथा ॥ ३।११६ ॥

अन्यच्च-

पापं स्त्री मृगया द्यूतमर्थ-दूषणम् एव च ।

वाग्-दण्डयोश्च पारुष्यं व्यसनानि महीभुजाम् ॥ ३।११७ ॥

किं च-

न साहसैकान्त-रसानुवर्तिना

न चाप्युपायोपहतान्तरात्मना ।

विभूतयः शक्यमवाप्तुम् ऊर्जिता

नये च शौर्ये च वसन्ति सम्पदः ॥ ३।११८ ॥

त्वया स्वबलोत्साहमवलोक्य, साहसैक-रसिकेन मयोपन्थस् तेष्व् अपि मन्त्रेष्व् अनवधानं, वाक्-पारुष्यं च कृतम् । अतो दुर्नीतेः फलम् इदमनुभूयते ।

तथा चोक्तम्-

दुर्मन्त्रिणं कम् उपयान्ति न नीति-दोषाः ?

सन्तापयन्ति कमपथ्य-भुजं न रोगाः ?

कं श्रीःन दर्पयति कं न निहन्ति मृत्युः

कं स्त्री-कृता न विषयाः परितापयन्ति ॥ ३।११९ ॥

अपरं च-

मुदं विषादः शरदं हिमागमस्

तमो विवस्वान् सुकृतं कृतघ्नता ।

प्रियोपपत्तिः शुचमापदं नयः

श्रियः समृद्धा अपि हन्ति दुर्नयः ॥ ३।१२० ॥

ततो मयाप्यालोचितम्-प्रज्ञा-हीनोऽयं राजा । न चेत् कथं नीति-शास्त्र-कथा-कौमुदीं वाग्-उल्काभिस् तिमिरयति ।

यतः-

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ?
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ३।१२१ ॥

इत्यालोच्याहमपि तूष्णीं स्थितः । अथ राजा बद्धाञ्जलिःआह-तात ! अस्त्ययं ममापराधः, इदानीं यथाहमवशिष्ट-बल-सहितः प्रत्यावृत्त्य विन्ध्याचलं गच्छामि, तथोपदिश ।

गृध्रः स्वगतं चिन्तयति-क्रियतामत्र प्रतीकारः ।

यतः-

देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा कोपो बाल-वृद्धातुरेषु च ॥ ३।१२२ ॥

मन्त्री प्रहस्य ब्रूते-देव मा भैषीः । समाश्वसिहि ।

शृणु देव-

मन्त्रिणां भिन्न-सन्धाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः ॥ ३।१२३ ॥

अपरं च-

आरम्भन्तेऽल्पम् एवाज्ञाः कामं व्यग्रा भवन्ति च ।

महारम्भाः कृत-धियस् तिष्ठन्ति च निराकुलाः ॥ ३।१२४ ॥

तदत्र भवत्प्रतापादेव दुर्गं भङ्क्त्वा, कीर्ति-प्रताप-सहितं त्वामचिरेण कालेन विन्ध्याचलं नेष्यामि ।

राजाह-कथमधुना स्वल्प-बलेन तत् सम्पद्यते ?

गृध्रो वदति- देव ! सर्वं भविष्यति । यतो विजिगीषोःअदीर्घ-सूत्रता विजय-सिद्धेःअवश्यम्भावि लक्षणम् । तत् सहसैव दुर्गद्वारावरोधः क्रियताम् ।

अथ प्रहितप्रणिधिना बकेनागत्य हिरण्यगर्भस्य कथितम्-देव ! स्वल्प-बल एवायं राजा चित्रवर्णो गृध्रस्य वचनोपष्टम्भादागत्य दुर्ग-द्वारावरोधं करिष्यति ।

राजहंसो ब्रूते- स्वबले सारासार-विचारः क्रियताम् । तज् ज्ञात्वा सुवर्ण-वस्त्रादिकं यथार्हं प्रसाद-प्रदानं च क्रियताम् ।

यतः-

यः काकिणीमप्यपथ-प्रपन्नां

समुद्धरेन् निष्क-सहस्र-तुल्याम् ।

कालेषु कोटिष्व् अपि मुक्त-हस्तस्

तं राज-सिंहं न जहाति लक्ष्मीः ॥ ३।१२५ ॥

अन्यच्च-

क्रतौ विवाहे व्यसने रिपु-क्षये

यशस्करे कर्मणि मित्र-सङ्ग्रहे ।

प्रियासु नारीष्व् अधनेषु बान्धवेष्व्

अतिव्ययो नास्ति नराधिपाष्टसु ॥ ३।१२६ ॥

यतः-

मूर्खः स्वल्प-व्यय-त्रासात् सर्वनाशं करोति हि ।

कः सुधीः सन्त्यजेद् भाण्डं शुल्कस्यैवातिसाध्वसात् ॥ ३।१२७ ॥

राजाह-कथम् इह समयेऽतिव्ययो युज्यते ? उक्तं च-आपद्-अर्थे धनं रक्षेदिति ।

मन्त्री ब्रूते- श्रीमतां कथमापदः ?

राजाह- कदाचिच्चलिता लक्ष्मीः ।

मन्त्री ब्रूते- सञ्चितापि विनश्यति । तद् देव ! कार्पण्यं विमुच्य स्व-भटा दान-मानाभ्यां पुरस्क्रियन्ताम् ।

तथा चोक्तम्-

परस्परज्ञाः संहृष्टास् त्यक्तुं प्राणान् सुनिश्चिताः ।

कुलीनाः पूजिताः सम्यग् विजयन्ते द्विषद्-बलम् ॥ ३।१२८ ॥

अपरं च-

सुभटाः शील-सम्पन्नाः संहताः कृत-निश्चयाः ।

अपि पञ्च-शतं शूरा निघ्नन्ति रिपु-वाहिनीम् ॥ ३।१२९ ॥

किं च-

शिष्टैःअप्यवशेषज्ञ उग्रश्च कृत-नाशकः ।

त्यज्यते किं पुनःनान्यैःयश् चाप्यात्मम्भरिःनरः ॥ ३।१३० ॥

यतः-

सत्यं शौर्यं दया त्यागो नृपस्यैते महा-गुणाः ।
एतैस्त्यक्तो महीपालः प्राप्नोति खलु वाच्यताम् ॥ ३।१३१ ॥

ईदृशि प्रस्तावेऽमात्यास्तावदवश्यम् एव पुरस्कर्तव्याः ।

तथा चोक्तम्-
यो येन प्रतिबद्धः स्यात् सह तेनोदयी व्ययी ।
स विश्वस्तो नियोक्तव्यः प्राणेषु च धनेषु च ॥ ३।१३२ ॥
यतः-
धूर्तः स्त्री वा शिशुःयस्य मन्त्रिणः स्युःमहीपतेः ।
अनीति-पवन-क्षिप्तो ऽकार्याब्धौ स निमज्जति ॥ ३।१३३ ॥
शृणु देव! -
हर्ष-क्रोधौ यतौ यस्य शास्त्रार्थे प्रत्ययस्तथा ।
नित्यं भृत्यानुपेक्षा च तस्य स्याद् धनदा धरा ॥ ३।१३४ ॥
येषां राज्ञा सह स्याताम् उच्चयापचयौ ध्रुवम् ।
अमात्या इति तान् राजा नावमन्येत् कदाचन ॥ ३।१३५ ॥
महीभुजो मदान्धस्य सङ्कीर्णस्येव दन्तिनः ।
स्खलतो हि करालम्बः सुशिष्टैःएव कीयते ॥ ३।१३६ ॥

अथागत्य प्रणम्य मेघवर्णो ब्रूते-देव ! दृष्टि-प्रसादं कुरु । इदानीं विपक्षो दुर्ग-द्वारि वर्तते । तद् देव-पादादेशाद् बहिःनिःसृत्य स्व-विक्रमं दर्शयामि । तेन देव-पादानामानृण्यम् उपगच्छामि । चक्रवाको ब्रूते- मैवम् । यदि बहिःनिःसृत्य योद्धव्यम् । तदा दुर्गाश्रयणम् एव निष्प्रयोजनम् ।

अपरं च-

विषमोऽपि यथा नक्रः सलिलान् निसृतो वशः ।

वनाद् विनिर्गतः शूरः सिंहो ऽपि स्याच् छगालवत् ॥ ३।१३७ ॥

अथ ते सर्वे दुर्ग-द्वारं गत्वा महाहवं कृतवन्तः । अपरेद्युश्चित्रवर्णो राजा गृध्रम् उवाच-तात ! स्वप्रतिज्ञातमधुना निर्वाहय ।

वायसो ब्रूते- देव ! स्वयं गत्वा दृश्यतां युद्धम् ।

यतः-

पुरस्कृत्य बलं राजा योधयेदवलोकयन् ।

स्वामिनाधिष्ठितः श्वापि किं न सिंहायते ध्रुवम् ॥ ३।१३८ ॥

गृध्रो ब्रूते- देव !

श्रृणु तावत्-

अकाल-सहमत्य्-अल्पं मूर्ख-व्यसनि-नायकम् ।

अगुप्तं भीरु-योधं च दुर्ग-व्यसनम् उच्यते ॥ ३।१३९ ॥

तत्तावदत्र नास्ति-

उपजापश्चिरारोधो ऽवस्कन्दस् तीव्र-पौरुषम् ।

दुर्गस्य लङ्घनोपायाश्चत्वारः कथिता इमे ॥ ३।१४० ॥

अत्र यथाशक्ति क्रियते यत्नः । (कर्णे कथयति)-एवम् एवम् । ततोऽनुदित एव भास्करे चतुर्ष्व् अपि दुर्ग-द्वारेषु प्रवृत्ते युद्धे, दुर्गाभ्यन्तर-गृहेष्व् एकदा काकैःअग्नि-निक्षिप्तः । ततः गृहीतं गृहीतं दुर्गम् इति कोलाहलं श्रुत्वा सर्वतः प्रदीप्ताग्निमवलोक्य राज-हंस-सैनिका बहवो दुर्ग-वासिनश्च सत्वरं ह्रदं प्रविष्टाः,

यतः-

सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितम् ।

कार्य-काले यथा-शक्ति कुर्यान्न तु विचारयेत् ॥ ३।१४१ ॥

राजा हंसश्च स्वभावान् मन्द-गतिः । सारस-द्वितीयश् चित्रवर्णस्य सेनापतिना कुक्कुटेनागत्य वेष्टितः । हिरण्यगर्भः सारसमाह-सेनापते ! सारस ! ममानुरोधादात्मानं कथं व्यापादयसि । अधुनाहं गन्तुमसमर्थः । त्वं गन्तुमधुनापि समर्थः । तद् गत्वा जलं प्रविश्यात्मानं परिरक्ष । अस्मत्पुत्रं चूडामणिनामानं सर्वज्ञस्य सम्मत्या राजानं करिष्यसि ।

सारसो ब्रूते- देव ! न वक्तव्यम् एवं दुःसहं वचः, यावच्चन्द्राकौं दिवि तिष्ठतस्तावद् विजयतां देवः ।अहं देव दुर्गाधिकारी । तन्मम मांसासृग् विलिप्तेन द्वारवर्त्मना तावत् प्रविशतु शत्रुः ।

अपरं च, देव-

दाता क्षमी गुण-ग्राही स्वामी दुःखेन लभ्यते ।

राजाह- सत्यम् एवैतत् ।

किन्तु-

शुचिः दक्षोऽनुरक्तश्च जाने भृत्यो ऽपि दुर्लभः ॥ ३।१४२ ॥

सारसो ब्रूते- श्र्णु देव!

यदि समरमपास्य नास्ति मृत्योर्

भयम् इति युक्तम् इतोऽन्यतः प्रयातुम् ।

अथ मरणमवश्यम् एव जन्तोः

किम् इति मुधा मलिनं यशः क्रियते ? ॥ ३।१४३ ॥

अन्यच्च-

भवेऽस्मिन् पवनोद्भ्रान्त-वीचि-विभ्रम-भङ्गुरे ।

जायते पुणय्-योगेन परार्थे जीवित-व्ययः ॥ ३।१४४ ॥

स्वाम्य्-अमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् ।

राज्याङ्गानि प्रकृतयः पौराणां श्रेणयो ऽपि च ॥ ३।१४५ ॥

देव ! त्वं च स्वामी सर्वथा रक्षणीयः ।

यतः-

प्रकृतिः स्वामिनं त्यक्त्वा समृद्धापि न जीवति ।

अपि धन्वन्तरिःवैद्यः किं करोति गतायुषि ॥ ३।१४६ ॥

अपरं च-

नरेशे जीव-लोकोऽयं निमीलति निमीलति ।

उदेत्युदीयमाने च रवाव् इव सरोरुहम् ॥ ३।१४७ ॥

अत्रापि प्रधानाङ्गं राजा ।

अथ कुक्कुटेनागत्य राजहंसस्य शरीरे खरतर-नखाघातः कृतः । तदा सत्वरम् उपसृत्य सारसेन स्व-देहान्तरितो राजा जले क्षिप्तः ।

अथ कुक्कुट-नख-प्रहार-जर्जरीकृतेनापि सारसेन कुक्कुट-सेना बहुशो हता । पश्चात् सारसो ऽपि बहुभिः पक्षिभिः समेत्य चञ्चु-प्रहारेण विभिद्य व्यापादितः । अथ चित्रवर्णो दुर्गं प्रविश्य, दुर्गावस्थितं द्रव्यं ग्राहयित्वा वन्दिभिःजय-शब्दैःआनन्दितः स्व-स्कन्धावारं जगाम ।

अथ राज-पुत्रैःउक्तं-तस्मिन् राजहंस-पक्षे पुण्यवान् स सारस एव, येन स्वदेहत्यागेन स्वामी रक्षितः ।

यतः-

जनयन्ति सुतान् गावः सर्वा एव गवाकृतीन् ।
विषाणोल्लिखित-स्कन्धं काचिदेव गवां पतिम् ॥ ३।१४८ ॥

विष्णुशर्मोवाच- स तावत् सत्त्व-क्रीतान् अक्षय-लोकान् विद्याधरी-परिवृत्तो ऽनुभवतु महा-सत्त्वः ।
तथा चोक्तम्-
आहवेषु च ये शूराः स्वाम्य्-अर्थे त्यक्त-जीविताः ।
भर्तृ-भक्ताः कृतज्ञाश्च ते नराः स्वर्ग-गामिनः ॥ ३।१४९ ॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयान् लभते लोकान् यदि क्लैब्यं न गच्छति ॥ ३।१५० ॥

अथ विष्णुशर्मा प्राह-विग्रहः श्रुतो भवद्भिः ।
राजपुत्रैःउक्तम्-श्रुत्वा सुखिनो भूता वयम् ।
विष्णुशर्माब्रवीत्- अपरमप्य् एवमस्तु -
विग्रहः करि-तुरङ्ग-पत्तिभिर्
नो कदापि भवतान् महीभुजाम् ।
नीति-मन्त्र-पवनैः समाहताः
संश्रयन्तु गिरि-गह्वरं द्विषः ॥ ३।१५१ ॥

## इति श्रीनारायणपण्डितकृते हितोपदेशे नीति-शास्त्रे
## विग्रहो नाम तृतीयः कथासङ्ग्रहः ।

**सारांशः**

प्रधानकथायां काकः मयूरपक्षस्थः हंसस्य दुर्गद्वारं प्रति समागतः अतिथित्वेन । तं दृष्ट्वा चक्रवाको मन्त्री वदति सः तिरस्कार्य इति । परन्तु हिरण्यगर्भराजा तस्य वाक्ये आदरं न दत्तवान् । अतः तस्य नीतिबोधनाय श्रृगालकथा प्रोक्ता ।

तथाहि – अरण्ये कश्चित् श्रृगालो वसति । सः कदाचित् नगरं गतः तत्र नीलीभाण्डे पतितः । ततः उत्थातुम् असमर्थः तत्रैव मृत इव स्वरूपं दर्शयित्वा स्थितः । प्रातः मृतं श्रृगालं दृष्ट्वा भाण्डात् तं निस्सार्य गतः मनुष्यः । ततः नीलीभूतः श्रृगालः वनं गतः । तत्र विद्यमानान् स्वजनान् सर्वान् प्रतार्य राजा संजातः । ततः सर्वे जन्तवः तान् नमस्कृत्य गताः । एतज्ज्ञात्वा स्वजनान् सर्वांशेन त्यक्त्वा सिंहादीन् स्वीकृत्य राज्यपालनं कृतवान् । तेन खिन्नाः अन्ये श्रृगालाः एकेन उपायेन तस्य निजस्वरूपं दर्शयामासुः । ततः परं सर्वे श्रृगालं हतवन्तः । अतः स्वजनान् त्यक्त्वा परजनेषु आदरः न कर्तव्य इति नीतिः अत्र बोधिता ।

ततः परं युद्धाय सिद्धो जातः हिरण्यगर्भः । सम्यङ्मुहूर्ते युद्धाय प्रस्थितः मयूरः इत्यादिकथाप्रसङ्गः भवति ।

ततः परं काकः आदरणीय एव इति राजा कथारूपेण वदति । सा च कथा भवति – वीरवरकथा ।

शूद्रकस्य राज्ञः सभायां वीरवरः एकदा समागत्य मम उद्योगः अपेक्षितः इति प्रार्थितवान् तदर्थं प्रत्येकं दिनं चतुश्शतं सुवर्णं प्रार्थितवान् । राजापि अङ्गीकृतवान् । ततः परं कदाचित् रात्रौ क्रन्दनध्वनिः श्रुतः । सः कस्याश्चिद्बालिकाया इति ज्ञात्वा तत्पृष्ठे गतः वीरवरः । ध्वनिः राज्यलक्ष्म्याः इति ज्ञातवान्। ततः सा राज्यलक्ष्मीः यदि कश्चित् स्वपुत्रं बलिं ददाति तर्हि अहं पुनः सुखेन अत्र निवसामि इति उक्तवती । तच्छ्रुत्वा वीरवरः स्वपुत्रं हत्वा स्वस्य च प्राणं त्यक्तवान् ।ततः परं देवी सर्वेषां प्राणान् पुनः अददात्। तज्ज्ञात्वा राजापि अत्यन्तसन्तोषेण तं पोषितवान् । अतः मध्ये यः आयाति सोऽपि वीरवरवत् ग्राह्यः एव इति बोधितम् भवति ।

ततः परं चक्रवाकः असन्तुष्टः वदति – राज्ञां प्रीतिकरमेव वक्तव्यमिति न निर्बन्धः मन्त्रिणः किन्तु हितकरमेव इति द्योतनाय एकां कथां श्रावितवान् । सा च नापितकथा ।

अयोध्यानगरे चूडामणिनामकः क्षत्रियः अस्ति । सः शिवं तपसा साक्षात्कृत्य प्राप्तवरः सन् सन्यासिनं लगुडप्रहारेण ताडनं कर्तव्यमिति वरेण तथानुष्ठिते सः भिक्षुसन्यासी सुवर्णपात्ररूपेण परिवर्तितः तं स्वीकृत्य सुखेन निवसति । इदं सर्वं ज्ञात्वा नापितोऽपि एकं भिक्षुसन्यासिनः लगुडहस्तेन ताडितवान् । ततः परं राजभटैः नीतः अनन्तरं दण्डदानेन मृतश्च ।

ततः परं युद्धः आरब्धः सारसपक्षिणः मयूरसेनां प्रायेण नाशितवन्तः । तन्मध्ये हिरण्यगर्भस्य दुर्गस्थः काकः सर्वं दुर्गं अग्नौ स्थापितवान् । तेन हिरण्यगर्भसेना भीता सती नष्टं प्राप्ता भवति । हिरण्यगर्भोऽपि युद्धात् पलायितः सरोवरे अन्तर्गतः । तेन च विजयं प्राप्तः मयूरः इति विग्रहस्य सारं कथितवान् विष्णुशर्मा ।

## बोधप्रश्नाः

1. हिरण्यगर्भः कं दुर्गानुसंधाने नियोजनं कृतवान्?
2. उत्तमो रसः कः?
3. वीरवरः कं बलिदानं कृतवान्?
4. चूडामणिः कस्य देशस्य राजा?
5. यस्य नास्ति स्वयं प्रज्ञा तस्य शास्त्रं किं करोति?

## शब्दावली

1. स्थलचरः
2. मेघवर्णः
3. गोमयायते
4. प्रतीहारः
5. शूद्रकः

6. वीरवरः
7. चूडामणिः

### सन्दर्भग्रन्थः -

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

### सहायकग्रन्थाः –

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

### बोधप्रश्नोत्तराणि –

1. सारसम्
2. लवणः
3. स्वपुत्रम्
4. अयोध्यायाः
5. उपयोगाय न भवति

### अभ्यासप्रश्नाः

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थीकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः 3

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

विग्रहः समाप्ते सति राजपुत्राः सन्धिं प्रार्थितवन्तः। तदर्थं विष्णुशर्मा सन्धिं श्रावयामास। तथाहि- युद्धे पराजयानन्तरं खिन्नमनाः राजहंसाः बभूवुः – केन दुर्गे अग्निः निक्षिप्तः इति। तस्य उत्तरं ददाति चक्रवाकः- काकः इति। तज्ज्ञात्वा दैवं निन्दति हंसः। ततः परं किं कर्तव्यमिति पृष्टे चक्रवाकः सन्धिः कार्यः इति उपदेशं कृतवान्। तत्र प्रथमा कथा भवति संकटविकटयोः कथा। अनय कथया यः बुद्धिमतः वाक्यं न श्रृणोति सः दुर्गतिमेव प्राप्नोतीति नीतिः द्योत्यते। तत्रैव अवान्तरकथा भवति प्रतुत्पन्नमतिरूपमत्स्यत्रयस्य कथा भवति। तया कथया आपत्कालेपि बुद्धिचातुर्यमेव उपकरोति इति नीतिः द्योतिता। ततः परं समुद्रदत्तस्य कथा भवति । अनया कथया आपत्कालेपि भयं त्यक्त्वा चातुर्येण

कार्ये कृते साफल्यं भवति इति नीतिः ज्ञायते । ततः परं गृद्धकूटपर्वते विद्यमानानां बकानां कथा तया कथया यः उपायं पश्यति सः अपायमपि जानीयात् इति नीतिः ज्ञायते । ततः परं मूषिककथा , अत्र च दुष्टस्य उपायः न कर्तव्यः इति नीतिः बोधिता । अनन्तरं कर्कटबकमत्स्यानां कथा , तत्र च लोभः नाशकारणं भवति इति नीतिः पाठिता । अस्य खण्डस्य अन्ते देवकोट्टब्राह्मणकथां श्रावयामास दूरदर्शी गृद्धः । तत्र च अनागतविषयेषु अत्यन्तमतिः न देया इति नीतिः कथिता भवति ।

## उद्देश्यम्

- शान्तिः कथं प्राप्तुं शक्यते इति ज्ञानं भवति
- सन्धिनीतयः ज्ञायन्ते
- श्लोकरूपेण बहुविधनीतीनां स्वरूपं ज्ञायते
- विभिन्नशब्दानां परिचयो भवति।
- विभिन्नदेशानां ज्ञानं जायते।

ततस्तेन राजहंसेन उक्तम्-केनास्मद्दुर्गे निक्षिप्तोऽग्निः ? किं पारक्येण ? किं वास्मद्दुर्गवासिना केनापि विपक्षप्रयुक्तेन ?

चक्रवाको ब्रूते- देव ! भवतो निष्कारण-बन्धुरसौ मेघवर्णः सपरिवारो न दृश्यते । तन्मन्ये तस्यैव विचेष्टितम् इदम् ।

राजा क्षणं विचिन्त्याह- अस्ति तावदेवम् । मम दुर्दैवम् एतत् ।

तथा चोक्तम्-

अपराधः स दैवस्य न पुनःमन्त्रिणामयम् ।
कार्यं सुचरितं क्वापि दैव-योगाद् विनश्यति ४।२ ॥
विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्म-दोषांश्च नैव जानात्यपण्डितः ॥ ४।३ ॥

अपरं च-

सुहृदां हित-कामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति ॥ ४।४ ॥

अन्यच्च-

रक्षितव्यं सदा वाक्यं वाक्याद् भवति नाशनम् ।
हंसाभ्यां नीयमानस्य कूर्मस्य पतनं यथा ॥ ४।५ ॥

राहाह-कथम् एतत् ?

मन्त्री कथयति-

## ०४-०१ हंसकूर्मयोः कथा

सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ४॥
अन्यच्च- रक्षितव्यं सदा वाक्यं वाक्याद् भवति नाशनम् ।
हंसाभ्यां नीयमानस्य कूर्मस्य पतनं यथा ॥ ४।५ ॥

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः । तत्र चिरं सङ्कट-विकट-नामानौ हंसौ निवसतः । तयोःमित्रं कम्बुग्रीवनामा कूर्मश्च प्रतिवसति । अथैकदा धीवरैः आगत्य तथोक्तं यत्- अत्रास्माभिःअद्योषित्वा प्रातःमत्स्य-कूर्मादयो व्यापादयितव्याः ।तदाकर्ण्य कूर्मो हंसावाह-सुहृदौ ! श्रुतोऽयं धीवरालापः । अधुना किं मया कर्तव्यम्?

हंसावाहतुः- ज्ञायतां तावत् । पुनस्तावत् प्रातःयदुचितं तत् कर्तव्यम् ।

कूर्मो ब्रूते- मैवम् । यतो दृष्ट-व्यतिकरो ऽहमत्र ।

यथा चोक्तम्-

अनागत-विधाता च प्रत्युत्पन्न-मतिस्तथा ।
द्वावेव सुखम् एधेते यद्-भविष्यो विनश्यति ॥ ४।६ ॥

ताव् ऊचतुः-कथम् एतत् ?

कूर्मः कथयति-

## ०४-०२ दूरदर्शीमत्स्यानां कथा

अनागत-विधाता च प्रत्युत्पन्न-मतिस्तथा ।
द्वावेव सुखम् एधेते यद्-भविष्यो विनश्यति ॥ ४।६ ॥

पुरास्मिन्नेव सरस्येवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्य-त्रयेणालोचितम् । तत्रानागत-विधाता नामैको मत्स्यः । तेनोक्तं-अहं तावज्जलाशयान्तरं गच्छामि । इत्युक्त्वा स ह्रदान्तरं गतः । अपरेण प्रत्युत्पन्नमति-नाम्ना मस्त्येनाभिहितम्-भविष्यद्-अर्थे प्रमाणाभावात् कुत्र मया गन्तव्यम् ? तदुत्पन्ने यथा-कार्यं तदनुष्ठेयम् ।

तथा चोक्तम्-

उत्पन्नामापदं यस् तु समाधत्ते स बुद्धिमान् ।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ ४।७ ॥

यद्भविष्यः पृच्छति- कथम् एतत् ?

प्रत्युत्पन्नमतिः कथयति-

## ०४-०३ रत्नप्रभायाः कथा

पुरा विक्रमपुरे समुद्रदत्तो नाम वणिग् अस्ति। तस्य रत्नप्रभा नाम गृहिणी स्व-सेवकेन सह सदा रमते।

यतः-

न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते।
गावस् तृणम् इवारण्ये प्रार्थयन्ते नवं नवम् ॥ ४।८ ॥

अथैकदा सा रत्नप्रभा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनावलोकिता। ततः सा बन्धकी सत्वरं भर्तुः समीपं मत्वाह-नाथ ! एतस्य सेवकस्य महती निकृतिः। यतोऽयं चौरिकां कृत्वा कर्पूरं खादतीति। मयास्य मुखमाघ्राय ज्ञातम्।

तथा चोक्तम्-

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्-गुणा।
षड्-गुणो व्यवसायश्च कामाश् चाष्टगुणः स्मृतः ॥ ४।९ ॥

तच्छ्रुत्वा सेवकेनापि प्रकुप्योक्तं-नाथ ! यस्य स्वामिनो गृहे एतादृशी भार्या तत्र सेवकेन कथं स्थातव्यम् ? यत्र च प्रतिक्षणं गृहिणी सेवकस्य मुखं जिघ्रति। ततोऽसावुत्थाय चलितः। साधुना च यत्नात् प्रबोध्य धृतः।

अतोऽहं ब्रवीमि- उत्पन्नामापदम् इत्यादि।

ततो यद्भविष्येणोक्तम्-

यदभावि न तद् भावि भावि चेन्न तदन्यथा।

इति चिन्ता-विष-घ्नो ऽयमगदः किं न पीयते ॥ ४।१० ॥

ततः प्रातः जालेन बद्धः प्रत्युत्पन्नमतिःमृतवदात्मानं सन्दर्श्य स्थितः । ततो जालादपसारितो यथाशक्त्य् उत्प्लुत्य गभीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः ।

अतोऽहं ब्रवीमि-अनागत-विधाता च इत्यादि ।

तद्यथाहमन्यं ह्रदं प्राप्नोमि तथा क्रियताम् ।हंसावाहतुः-जलाशयान्तरे प्राप्ते तव कुशलम् । स्थले गच्छतस् ते को विधिः ? कूर्म आह-यथाहं भवद्भ्यां सहाकाश-वर्त्मना यामि, तथा विधीयताम् ।

हंसावब्रूतः- कथम् उपायः सम्भवति ?

कच्छपो वदति-युवाभ्यां चञ्चु-धृतं काष्ठ-खण्डम् एकं मया मुखेनावलम्बितव्यम् । ततश्च युवयोः पक्ष-बलेन मयापि सुखेन गन्तव्यम् ।

हंसौ ब्रूतः-सम्भवत्य् एष उपायः ।

किन्तु-

उपायं चिन्तयेत् प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो बक-मूर्खस्य नकुलैःभक्षिताः सुताः ॥ ४।११ ॥

कूर्मः पृच्छति– कथम् एतत् ?

तौ कथयतः-

## ०४-०४ बकसर्पनकुलानां कथा

उपायं चिन्तयेत् प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो बक-मूर्खस्य नकुलैःभक्षिताः सुताः ॥ ४।११ ॥

अस्त्युत्तरा-पथे गृध्रकूट-नाम्नि पर्वते महान् पिप्पल-वृक्षः । तत्रानेके बका निवसन्ति । तस्य वृक्षस्याधस्ताद् विवरे सर्पस् तिष्ठति । स च बकानां बालापत्यानि खादति । अथ शोकार्तानां विलापं श्रुत्वा केनचिद् वृद्ध-बकेनाभिहितं-भो एवं कुरुत, यूयं मत्स्यान् उपादाय नकुल-विवरादारभ्य सर्प-विवरं यावत्-

पङ्क्ति-क्रमेण एकैकशो विकिरत । ततस्तद्-आहार-लुब्धैःनकुलैःआगत्य सर्पो द्रष्टव्यः । स्वभाव-द्वेषाद् व्यापदयितव्यश्च । तथानुष्ठिते सति तद् वृत्तम् ।

अथ नकुलैःवृक्षोपरि बक-शावकानां रावः श्रुतः । पश्चात् तद्-वृक्षमारुह्य बक-शावकाः खादिताः ।अत आवां ब्रूवः- उपायं चिन्तयन् इत्यादि ।

आवाभ्यां नीयमानं त्वामवलोक्य लोकैः किञ्चिद् वक्तव्यम् एव । यदि त्वम् उत्तरं दास्यसि, तदा त्वन्-मरणम् । तत् सर्वथैव स्थीयताम् ।

कूर्मो वदति-किमहमप्राज्ञः ? नाहम् उत्तरं दास्यामि । न किमपि मया वक्तव्यम् । तथानुष्ठिते तथा-विधं कूर्ममालोक्य सर्वे गोरक्षकाः पश्चाद् धावन्ति, वदन्ति च- अहो ! महदाश्चर्यम् ! पक्षिभ्यां कूर्मो नीयते ।

कश्चिद् वदति- यद्ययं कूर्मः पतति, तदात्रैव पक्त्वा खादितव्यः ।

कश्चिद् वदति- सरसस्तीरे दग्ध्वा खादितव्यो ऽयम् ।

कश्चिद् वदति- गृहं नीत्वा भक्षणीयः । इति ।

तद्-वचनं श्रुत्वा स कूर्मः कोपाविष्टो विस्मृत-पूर्व-संस्कारः प्राह-युष्माभिःभस्म भक्षितव्यम् इति वदन्न् एव पतितस्तैःव्यापादितश्च ।

अतोऽहं ब्रवीमि- सुहृदां हित-कामानाम् इत्यादि ।

अथ प्रणिधिःबकस्तत्रागत्योवाच- देव ! प्राग् एव मया निगदितं दुर्ग-शोध हि प्रतिक्षणं कर्तव्यम् इति । तच्च युष्माभिःन कृतं, तद्-अनवधानस्य फलम् इदमनुभूतम् । दुर्ग-दाहो मेघवर्णेन वायसेन गृध्र-प्रत्युक्तेन कृतः ।

राजा निःश्वस्याह-

प्रणयादुपकाराद् वा यो विश्वसिति शत्रुषु ।

स सुप्त इव वृक्षाग्रात् पतितः प्रतिबुध्यते ॥ ४।१२ ॥

कृत-कृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत् ।

फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत् ॥ ४।१३ ॥

चक्रवाको ब्रूते-देव ! श्रुतं यत् प्रणिधिः कथयति ?

राजा प्राह– ततस्ततः ?

प्रणिधिःउवाच- ततः प्रधान-मन्त्रिणा गृध्रेणाभिहितम्-देव ! नेदम् उचितम् । प्रसादान्तरं किमपि क्रियताम् ।

यतः-

अविचारयतो युक्ति-कथनं तुष-खण्डनम् ।

नीचेषूपकृतं राजन् बालुकास्विव मूत्रितम् ॥ ४।१४ ॥

महतामास्पदे नीचः कदापि न कर्तव्यः ।

तथा चोक्तम्-

नीचः श्लाघ्य-पदं प्राप्य स्वामिनं हन्तुम् इच्छति ।

मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ ४।१५ ॥

चित्रवर्णः पृच्छति–कथम् एतत् ?

मन्त्री कथयति-

## ०४-०५ मुनिमूषिकयोः कथा

नीचः श्लाघ्य-पदं प्राप्य स्वामिनं हन्तुम् इच्छति ।

मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ ४।१५ ॥

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तत्र तेन आश्रम-सन्निधाने मूषिक-शावकः काक-मुखाद् भ्रष्टो दृष्टः । ततो दया-युक्तेन तेन मुनिआ नीवार-कणैः संवर्धितः । ततो बिडालस् तं मूषिकं खादितुम् उपधावति । तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश । ततो मुनिनोक्तम्-मूषिक ! त्वं मार्जारो भव । ततः स बिडालः कुक्कुरं दृष्ट्वा पलायते । ततो मुनिनोक्तं-कुक्कुराद् बिभेषि, त्वम् एव कुक्कुरो भव । स च कुक्कुरो व्याघ्राद् बिभेति ततस् तेन मुनिना कुक्कुरो व्याघ्रः कृतः ।

अथ तं व्याघ्रं मुनिःमूषिकोऽयम् इति पश्यति । अथ तं मुनिं व्याघ्रं च दृष्ट्वा सर्वे वदन्ति-अनेन मुनिना मूषिको व्याघ्रतां नीतः । एतच् छ्रुत्वा स-व्यथो व्याघ्रो ऽचिन्तयत्-यावदनेन मुनिना स्थीयते, तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते इत्यालोच्य मूषिकस् तं मुनिं हन्तुं गतः । ततो मुनिना तज् ज्ञात्वा-पुनःमूषिको भव इत्युक्त्वा मूषिक एव कृतः ।

अतोऽहं ब्रवीमि-नीचः श्लाघ्य-पदं प्राप्येत्यादि ॥

अपरं च, देव - सुकरम् इदम् इति न मन्तव्यम् ।

शृणु-

भक्षयित्वा बहून् मत्स्यान् उत्तमाधम-मध्यमान् ।

अतिलोभाद् बकः पश्चान् मृतः कर्कटक-ग्रहात् ॥ ४।१६ ॥

चित्रवर्णः पृच्छति–कथम् एतत् ?

मन्त्री कथयति-

## ०४-०६ अतिलोभी बकः

भक्षयित्वा बहून् मत्स्यान् उत्तमाधम-मध्यमान् ।

अतिलोभाद् बकः पश्चान् मृतः कर्कटक-ग्रहात् ॥ ४।१६ ॥

अस्ति मालव-विषये पद्मगर्भाभिधानं सरः । तत्रैको वृद्धो बकः सामर्थ्य-हीन उद्विग्नम् इवात्मानं दर्शयित्वा स्थितः । स च केनचित् कुलीरणे दूरादेव दृष्टः । पृष्टश्च-किम् इति भवान् अत्राहार-त्यागेन तिष्ठति ?

बकेनोक्तम्-मत्स्या मम जीवन-हेतवः । ते कैवर्तैःआगत्य व्यापादयितव्या इति वार्ता नगरोपान्ते मया श्रुता । अतो वर्तनाभावादेवास्मन् मरणम् उपस्थितम् इति ज्ञात्वाहारेऽप्यनादरः कृतः । ततो मत्स्यैःआलोचितम्-इह समये तावदुपकारक एवायं लक्ष्यते । तदयम् एव यथा-कर्तव्यं पृच्छ्यताम् ।

तथा चोक्तम्-

उपकर्त्रारिणा सन्धिःन मित्रेणापकारिणा ।

उपकारापकारो हि लक्ष्यं लक्षणम् एतयोः ॥ ४।१७ ॥

मत्स्या ऊचुः- भो बक ! कोऽत्र अस्माकं रक्षनोपायः ?

बको ब्रूते- अस्ति रक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहम् एकैकशो युष्मान्नयामि ।

मत्स्या आहुः- एवमस्तु । ततोऽसौ दुष्ट-बकस्तान् मत्स्यान् एकैकशो नीत्वा खादति । अनन्तरं कुलीरस्तम् उवाच-भो बक ! मामपि तत्र नय । ततो बकोऽप्यपूर्व-कुलीर-मांसार्थी सादरं तं नीत्वा स्थले धृतवान् । कुलीरो ऽपि मस्त्य-कण्टकाकीर्णं तं स्थलमालोक्याचिन्तयत्-हा हतोऽस्मि मन्द-भाग्यः । भवतु इदानीं समयोचितं व्यवहरिष्यामि ।

यतः-

तावद् भयेन भेतव्यं यावद् भयमनागतम् ।

आगतं तु भयं दृष्ट्वा प्रहरत्वयमभीतिवत् ॥ ४।१८ ॥

किं च-

अभियुक्तो यदा पश्येन्न किञ्चिद् गतिमात्मनः ।
युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह ॥ ४।१९ ॥

इत्यालोच्य स कुलीरकस्तस्य बकस्य ग्रीवां चिच्छेद । अथ स बकः पञ्चत्वं गतः । अतोऽहं ब्रवीमि-भक्षयित्वा बहून् मत्स्यान् इत्यादि ।

ततश्चित्रवर्णोऽवदत्- शृणु तावन् मन्त्रिन् ! मयैतदालोचितम् । अस्ति यदत्रावस्थितेनानेन मेघवर्णेन राज्ञा यावन्ति वस्तूनि कर्पूर-द्वीपस्योत्तमानि तावन्त्य् अस्माकम् उपनेतव्यानि । तेनास्माभिःमहा-सुखेन विन्ध्याचले स्थातव्यम् । दूरदर्शी विहस्याह- देव !

अनागतवतीं चिन्तां कृत्वा यस् तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्न-भाण्डो द्विजो यथा ॥ ४।२० ॥

राजाह-कथम् एतत् ?

मन्त्री कथयति-

## ०४-०७ भग्नभाण्डो द्विजः

अनागतवतीं चिन्तां कृत्वा यस् तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्न-भाण्डो द्विजो यथा ॥ ४।२० ॥

अस्ति देवी-कोट-नाम्नि नगरे देवशर्मा नाम ब्राह्मणः । तेन महाविषुवत्-सङ्क्रान्त्यां सक्तुपूर्णशराव एकः प्राप्तः । ततस्तमादायासौ कुम्भकारस्य भाण्डपूर्ण-मण्डपैक-देशे रौद्रेणाकुलितः सुप्तः । ततः सक्तु-रक्षार्थं हस्ते दण्डम् एकमादायाचिन्तयत्-अद्याहं सक्तुशरावं विक्रीय दश कपर्दकान् प्राप्स्यामि, तदात्रैव

तैः कपर्दकैःघटशरावादिकम् उपक्रीयानेकधा वृद्धैस्तद्-धनैः पुनः पुनः पूर्ग-वस्त्रादिम् उपक्रीय, विक्रीय लक्ष-सङ्ख्यानि धनानि कृत्वा, विवाह-चतुष्टयं करिष्यामि । अनन्तरं तासु स्व-पत्नीषु या रूप-यौवनवती तस्यामधिकानुरागं करिष्यामि । सपत्न्यो यदा द्वन्द्वं करिष्यामि, तदा कोपाकुलो ऽहं ताः सर्वा लगुडेन ताडयिष्यामीत्यभिधाय तेन लगुडः प्रक्षिप्तः । तेन सक्तुशरावश् चूर्णितो भाण्डानि च बहूनि भग्नानि । ततस् तेन शब्देनागतेन कुम्भकारेण तथा-विधानि भाण्डान्य् अवलोक्य, ब्राह्मणस् तिरस्कृतो मण्डपाद् बहिष्कृतश्च ।

अतोऽहं ब्रवीमि - अनागतवतीं चिन्ताम् इत्यादि ।

ततो राजा रहसि गृध्रम् उवाच-तात ! यथा कर्तव्यं तथोपदिश ।

गृध्रो ब्रूते-

मदोद्धतस्य नृपतेः प्रकीर्णस्येव दन्तिनः ।

गच्छन्त्य् उन्मार्ग-यातस्य नेतारः खलु वाच्यताम् ॥ ४।२१ ॥

शृणु देव ! किमस्माभिःबल-दर्पाद् दुर्गं भग्नम् ? उत तव प्रतापाधिष्ठितेनोपायेन ?

राजाह- भवताम् उपायेन ।

गृध्रो ब्रूते- यद्यस्मद्वचनं क्रियते, तदा स्वदेशे गम्यताम् । अन्यथा वर्षा-काले प्राप्ते पुनस् तुल्य-बलेन विग्रहे सत्यस्माकं पर-भूमिष्ठानां स्व-देश-गमनमपि दुर्लभं भविष्यति । तत्-सुख-शोभार्थं सन्धाय गम्यताम् । दुर्गं भग्नं, कीर्तिश्च लब्धेव । मम सम्मतं तावदेतत् ।

यतः-

यो हि धर्मं पुरस्कृत्य हित्वा भर्तुः प्रियाप्रिये ।

अप्रियाण्य् आह पथ्यानि तेन राजा सहायवान् ॥ ४।२२ ॥

अन्यच्च-

सुहृद्-बलं तथा राज्यमात्मानं कीर्तिम् एव च ।

युधि सन्देहदोलास्थं को हि कुर्यादबालिशः ॥ ४।२३ ॥

अपरं च-

सन्धिम् इच्छेत् समेनापि सन्दिग्धो विजयो युधि ।

नहि संशयितं कुर्यादित्युवाच बृहस्पतिः ॥ ४।२४ ॥

अपि च-

युद्धे विनाशो भवति कदाचिदुभयोःअपि ।

सुन्दोप-सुन्दावन्योन्यं नष्टौ तुल्य-बलौ न किम् ॥ ४।२५ ॥

राजोवाच–कथम् एतत् ?

## सारांशः

विग्रहानन्तरं राजपुत्राः समाधि(शान्ति)विषये ज्ञानं प्राप्तुं विष्णुशर्माणं प्रार्थितवन्तः । अतः विष्णुशर्मा पूर्वस्थविग्रहकथायामेव कथं शान्तिः जाता इति सन्धिग्रन्थे प्रतिपादयति ।

मयूरहंसयोः सन्धिः बुद्धिमद्भ्यां गृध्रचक्रवाकाभ्यां कृता भवति । तथाहि –

युद्धसमाप्त्यनन्तरं हिरण्यगर्भः चक्रवाकम् अपृच्छत् – कः अग्निं संस्थापितवान् दुर्गे इति । चक्रवाको वदति काकः एव । स एव सपरिवारः अत्र नैव दृश्यते इति ।

ततः परं बुद्धिमतः वाक्यं यः न श्रृणोति सः दुर्गतिं प्राप्नोति इति द्योतनाय संकटविकटहंसयोः कथा श्राविता चक्रवाकेन ।

तथाहि – संकटविकटनामानौ द्वौ हंसौ स्तः । तयोः कम्बुग्रीवनामा कूर्मः मित्रमासीत् । एकदा मत्स्यजीविः तत्र तडागे आगत्य भोजनार्थं कच्छपादिकं मारयितव्यमिति चिन्तयामास । तदानीं एकां कथां श्रावयामास कच्छपः । सैव मत्स्यत्रयकथा । तत्रैव रत्नप्रभायाः अपि कथा अवान्तरकथारूपेण समागता ।

समुद्रदत्तस्य पत्नी रत्नप्रभा भवति । सर्वदा सा सेवकेन रमते । एकदा तयोः क्रीडासमये समुद्रदत्तः तौ दृष्टवान् । भीतापि सा प्रतिभया उत्तरं दत्तवती – भवतां कृते कर्पूर आनीतः तदयं खादितवान् इति । ततः पतिः तां किमपि कृत्तवान् । अनया कथया इदं ज्ञायते यत् आपत्कालेऽपि भयं त्यक्त्वा बुद्धेः कार्यं कर्तव्यमिति ।

ततः परं गृद्धकूटपर्वते विद्यमानानां बकानां कथा भवति । तया कथया यः उपायं पश्यति सः तदीय-अपायमपि जानीयात् इति नीतिः प्रतिपादिता ।

ततः परं मूषिकमुनिकथा गृद्धोक्ता भवति । तत्र मुनिः मूषिकं व्याघ्रं कृतवान् । ततः व्याघ्रीभूतः मूषिकः मुनिं खादितुं आगतः इति सारः तस्याः ।

अनन्तरं कर्कटबककथा भवति । लोभाविष्टः बकः उत्तममध्यमाधममत्स्यानां भोजनानन्तरमपि लोभात् कर्कटमपि खादितुं इच्छति परन्तु कर्कटः तं मारितवान् इति कथासारः ।

ततः दूदर्शीगृद्धः राज्ञे देवकोट्टब्राह्मणकथां श्रावयामास । तत्र ब्राह्मणः स्वप्ने एव सर्वं लब्धमिति सर्वान् घटान् ताडयामास । तेन कुलालेन ताडितो सन् ततः निवृत्तः इति कथा । अतः अनागतेषु अत्यन्तमतिः न देया इति नीतिः ज्ञापिता ।

## बोधप्रश्नाः

1. केन दुर्गे निक्षिप्तोऽग्निः?
2. जनः विषमदशां प्राप्य कं निन्दति?
3. रत्नप्रभा कस्य पत्नी?
4. उपायं यः चिन्तयति सः किं चिन्तयेत्?
5. केन मूषिकः व्याघ्रतां नीतः?

## शब्दावली

1. सन्धिः

2. समुद्रदत्तः
3. गृद्धकूटः
4. महातपाः
5. पद्मगर्भः
6. देवशर्मा
7. प्रत्युत्पन्नमतिः

## सन्दर्भग्रन्थः -

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

## सहायकग्रन्थाः –

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

## बोधप्रश्नोत्तराणि –

1. मेघवर्णेन
2. दैवम्
3. समुद्रदत्तस्य
4. अपायमपि
5. महातपमुनिना

## अभ्यासप्रश्नाः

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थीकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः 4

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

युद्धे अधिकबलेन न योद्धव्यं तथा समबलेनापि न योद्धव्यमिति मन्त्रिणा उक्तम् । तत्र संदिह्य राजा आह समबलेन कुतो न योद्धव्यमिति । तदर्थं मन्त्री सुन्दोपसुन्दरूपदैत्यभ्रात्रोः कथां श्रावयामास । तया कथया समबलावपि उभौ युद्धे नष्टौ जातौ इति उक्त्वा तथा युद्धः न कर्तव्यः इति नीतिः बोधिता । एतत्कथां श्रुत्वा राजा दुःखेन अपृच्छत् किमर्थमिदं पूर्वमेव भवति नोपदिष्टमिति । तच्छ्रुत्वा मन्दहासेन मन्त्री अकथयत्- मद्वाक्यं भवता पूर्वं न श्रुतम् अत एव इयं दशा भवताम् इति। एवं गृद्धमयूरसंवादः तथा हंसचक्रवाकयोः संवादश्च बहुधा अभूत् । तत्रैव असन्धेयाः के इत्यपि दर्शिताः। ततः परं मेघवर्णः ब्राह्मणकथां श्रावयामास । पण्डितोपि ब्राह्मणः कथं धूर्तवचसा मूर्खतां प्राप्य अजां त्यक्तवानिति न्यायमुक्त्वा एवमेव प्रकारेण मद्वाक्ये श्रद्धां दत्त्वा हिरण्यगर्भोपि नष्टः इति मेघवर्णः अकथयत् । ततः परं

तेनैव ईदृशमेव् उष्ट्रव्याघ्रसिंहादीनां कथापि प्रदर्शिता । तया कथया धीमानपि दुष्टवचसा नश्यति इति नीतिः बोधिता ।

## उद्देश्यम्

- कैः सह युद्धः कर्तव्यः इति ज्ञानं भवति
- असंधेयाः के इति ज्ञानमागच्छति
- दुष्टस्य वचनं दोषकरं भवति इति तत्त्वमवगच्छति
- विभिन्नशब्दानां परिचयो भवति।
- विभिन्नदेशानां ज्ञानं जायते।

मन्त्री कथयति-

# ०४-०८ सुन्दोपसुन्दथा

सन्धिम् इच्छेत् समेनापि सन्दिग्धो विजयो युधि ।
नहि संशयितं कुर्यादित्युवाच बृहस्पतिः ॥ ४।२४ ॥

पुरा दैत्यौ सहोदरौ सुन्दोपसुन्द-नामानौ महता काय-क्लेशेन त्रैलोक्य-राज्य-कामनया चिराच्चन्द्र-शेखरमाराधितवन्तौ । ततस्तयोःभगवान् परितुष्टः सन् वरं वरयतम् इत्युवाच । अनन्तरं तयोः कण्ठाधिष्ठितायाः सरस्वत्याः प्रभावात् तावन्यद् वक्तु-कामावन्यद्-अभिहितवन्तौ-यद्य् आवयोःभवान् परितुष्टस्तदा स्व-प्रियां पार्वतीं परमेश्वरो ददातु ।

अथ भगवता क्रुद्धेन वरदानस्यावश्यकतया, विचार-मूढयोः पार्वती प्रदत्ता । ततस्तस्या रूप-लावण्य-लुब्धाभ्यां, जगद्-घातिभ्यां मससोत्सुकाभ्यां, पाप-तिमिराभ्याम्, ममेत्यन्योन्यं

कलहायमानाभ्यां, प्रमाण-पुरुषः कश्चित् पृच्छ्यताम् इति मतौ कृतायां, स एव भट्टारको वृद्ध-द्विज-रूपः समागत्य तत्रोपस्थितः । अनन्तरं-आवाभ्याम् इयं स्व-बल-लब्धा, कस्येयमावयोःभवति इति ब्राह्मणमपृच्छताम् ।

ब्राह्मणो ब्रूते-

ज्ञान-श्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवान् अपि ।

धन-धान्याधिको वैश्यः शूद्रस् तु द्विज-सेवया ॥ ४।२६ ॥

तद्युवां क्षात्र-धर्मानुगौ । युद्द एव युवयोःनियम इत्यभिहिते सति साधूक्तमनेनेति कृत्वान्योन्य-तुल्य-वीर्यौ, समकालमन्योन्य-घातेन विनाशम् उपागतौ ।

अतोऽहं ब्रवीमि- सन्धिम् इच्छेत् समेनापि इत्यादि ।

राजाह- तत् प्राग् एव किं नेदम् उपदिष्टं भवद्भिः ?

मन्त्री ब्रूते- तदा मद्-वचनं किमवसान-पर्यन्तं श्रुतं भवद्भिः ? तदापि मम सम्मत्या नायं विग्रहारम्भः ।

यतः- साधु-गुण-युक्तोऽयं हिरण्यगर्भो न विग्राह्यः ।

तथा चोक्तं-

सत्यार्थौ धार्मिकोऽनार्यो भ्रातृ-सङ्घातवान् बली ।

अनेक-युद्ध-विजयी सन्धेयाः सप्त कीर्तिताः ॥ ४।२७ ॥

सत्यो ऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम् ।

प्राण-बाधेऽपि सुव्यक्तमार्यो नायात्यनार्थताम् ॥ ४।२८ ॥

धार्मिकस्याभियुक्तस्य सर्व एव हि युध्यते ।

प्रजानुरागाद् धर्माच्च दुःखोच्छेद्यो हि धार्मिकः ॥ ४।२९ ॥

सन्धिः कार्यो ऽप्यनार्येण विनाशे समुपस्थिते ।

विना तस्याश्रयेणार्यो न कुर्यात् काल-यापनम् ॥ ४।३० ॥

संहतत्वाद् यथा वेणुःनिविडैः कण्टकैःवृतः ।

न शक्यते समुच्छेत्तुं भ्रातृ-सङ्घातवांस्तथा ॥ ४।३१ ॥

बलिना सह योद्धव्यम् इति नास्ति निदर्शनम् ।

प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ ४।३२ ॥

जमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा ।

अनेक-युद्ध-जयिनः प्रतापादेव भज्यते ॥ ४।३३ ॥

अनेक-युद्ध-विजयी सन्धानं यस्य गच्छति ।

तत्-प्रतापेन तस्याशु वशमायान्ति शत्रवः ॥ ४।३४ ॥

तत्र तावद् बहुभिःगुणैःउपेतः सन्धेयो ऽयं राजा । चक्रवाकोऽवदत्-प्रणिधे ! सर्वमवगतम् । व्रज । पुनःआगमिष्यसि ।

अथ राजा हिरण्यगर्भश्चक्रवाकं पृष्ठवान्-मन्त्रिन् ! असन्धेयाः कति? तान् श्रोतुम् इच्छामि। मन्त्री ब्रूते- देव ! कथयामि ।

शृणु

बालो वृद्धो दीर्घ-रोगी तथाज्ञाति-बहिष्कृतः ।

भीरुको भीरुक-जनो लुब्धो लुब्ध-जनस्तथा ॥ ४।३५ ॥

विरक्त-प्रकृतिश् चैव विषयेष्व् अतिसक्तिमान् ।

अनेक-चित्त-मन्त्रस् तु देव-ब्राह्मण-निन्दकः ॥ ४।३६ ॥

दैवोपहतकश्चैव तथा दैव-परायणः ।

दुर्भिक्ष-व्यसनोपेतो बल-व्यसन-सङ्कुलः ॥ ४।३७ ॥

अदेशस्थो बहु-रिपुःयुक्तः कालेन यश्च न ।

सत्य-धर्म-व्यपेतश्च विंशतिः पुरुषा अमी ॥ ४।३८ ॥

एतैः सन्धिं न कुर्वीत विगृह्णीयात् तु केवलम् ।

एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोःवशम् ॥ ४।३९ ॥

बालस्याल्प-प्रभावत्वान्न लोको योद्धुम् इच्छति ।

युद्धायुद्ध-फलं यस्माज् ज्ञातुं शक्तो न बालिशः ॥ ४।४० ॥

उत्साह-शक्ति-हीनत्वाद् वृद्धो दीर्घामयस्तथा ।

स्वैःएव परिभूयेते द्वावप्य् एतावसंशयम् ॥ ४।४१ ॥

सुख-च्छेद्यो हि भवति सर्व-ज्ञाति-बहिष्कृतः ।

त एवैनं विनिघ्नन्ति ज्ञातयस् त्व् आत्म-सात्कृताः ॥ ४।४२ ॥

भीरुःयुद्ध-परित्यागात् स्वयम् एव प्रणश्यति ।

तथैव भीरु-पुरुषः सङ्ग्रामे तैःविमुच्यते ॥ ४।४३ ॥

लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः ।

लुब्धानुजीवी तैःएव दान-भिन्नैःनिहन्यते ॥ ४।४४ ॥

सन्त्य् अज्यते प्रकृतिभिःविरक्त-प्रकृतिःयुधि ।

सुखाभियोज्यो भवति विषयेवतिसक्तिमान् ॥ ४।४५ ॥

अनेक-चित्त-मन्त्रस् तु द्वेष्यो भवति मन्त्रिणाम् ।

अनवस्थित-चित्तत्वात् कर्यतः स उपेक्ष्यते ॥ ४।४६ ॥

सदाधर्म-बलीयस्त्वाद् देव ब्राह्मण-निन्दकः ।

विशीर्यते स्वयं ह्येष दैवोपहतकस्तथा ॥ ४।४७ ॥

सम्पत्तेश्च विपत्तेश्च दैवम् एव हि कारणम् ।

इति दैवपरो ध्यायन्नात्मना न विचेष्टते ॥ ४।४८ ॥

दुर्भिक्ष-व्यसनी चैव स्वयम् एव विषीदति ।

बल-व्यसन-सक्तस्य योद्धुं शक्तिःन जायते ॥ ४।४९ ॥

अदेश-स्थो हि रिपुणा स्वल्पकेनापि हन्यते ।

ग्राहो ऽल्पीयान् अपि जले जलेन्द्रमपि कर्षति ॥ ४।५० ॥

बहु-शत्रुस् तु सन्त्रस्तः श्येन-मध्ये कपोतवत् ।

येनैव गच्छति पथा तेनैवाशु विपद्यते ॥ ४।५१ ॥

अकाल-युक्त-सैन्यस् तु हन्यते काल-योधिना ।

कौशिकेन हत-ज्योतिःनिशीथ इव वायसः ॥ ४।५२ ॥

सत्य-धर्म-व्यपेतेन सन्दध्यान्न कदाचन ।

स सन्धितोऽप्यसाधुत्वादचिराद् याति विक्रियाम् ॥ ४।५३ ॥

अपरमपि कथयामि-सन्धि-विग्रह-यानासन-संश्रय-द्वैधी-भावाः षाड्गुण्यम् । कर्मणामारम्भोपायः । पुरुष-द्रव्य-सम्पत् । देश-काअ-विभागः । विनिपात-प्रतीकारः । कार्य-सिद्धिश् चेति पञ्चाङ्गो मन्त्रः । साम-दान-भेद-दण्डाश्चत्वार उपायाः । उत्साह-शक्तिः, मन्त्र-शक्तिः, प्रभु- शक्तिश् चेति शक्ति-त्रयम् । एतत् सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः ।

यतः-

या हि प्राण-परित्याग-मूल्येनापि न लभ्यते ।

सा श्रीःनीतिविदं पश्य चञ्चलापि प्रधावति ॥ ४।५४ ॥

यथा चोक्तं-

वित्तं सदा यस्य समं विभक्तं

गूढश्चरः सन्निभृतश्च मन्त्रः ।

नचाप्रियं प्राणिषु यो ब्रवीति

स सागरान्तां पृथिवीं प्रशास्ति ॥ ४।५५ ॥

किन्तु देव यद्यपि महा-मन्त्रिणा गृध्रेण सन्धानम् उपन्यस्तं, तथापि तेन राज्ञा सम्प्रति भूत-जय-दर्पान्न मन्तव्यम् । देव ! तदेवं क्रियतां । सिंहल-द्वीपस्य महाबलो नाम सारसो राजास्मन्-मित्रं जम्बुद्वीपे कोपं जनयतु ।

यतः-

सुगुप्तिमाधाय सुसंहतेन

बलेन वीरो विचरन्नरातिम् ।

सन्तापयेद् येन समं सुतप्तस्

तप्तेन सन्धानम् उपैति तप्तः ॥ ४।५६ ॥

राज्ञा एवमस्त्विति निगद्य विचित्र-नामा बकः सुगुप्त-लेखं दत्त्वा सिंहल-द्वीपं प्रहितः ।

अथ प्रणिधिः पुनःआगत्योवाच- देव ! श्रूयतां तावत् तत्रत्य-प्रस्तावः ।

एवं तत्र गृध्रेणोक्तम्- देव ! मेघवर्णस्तत्र चिरम् उषितः । स वेत्ति किं सन्धेय-गुण-युक्तो हिरण्यगर्भो राजा, न वा ? इति ।ततोऽसौ मेघवर्णश् चित्रवर्णेन राज्ञा समाहूय पृष्टः-वायस ! कीदृशो हिरण्यगर्भो राजा ? चक्रवाको मन्त्री वा कीदृशः ?

वायस उवाच- देव ! स हिरण्यगर्भो राजा युधिष्ठिर-समो महाशयः सत्य-वाक् । चक्रवाक-समो मन्त्री न क्वाप्यवलोक्यते ।

राजाह- यद्येवं तदा कथमसौ त्वया वञ्चितः ?

विहस्य मेघवर्णः प्राह- देव !

विश्वास-प्रतिपन्नानां वञ्चने का विदग्धता ।

अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥ ४।५७ ॥

शृणु देव ! तेन मन्त्रिणाहं प्रथम-दर्शने एवं विज्ञातः, किन्तु महाशयो ऽसौ राजा, तेन मया विप्रलब्धः ।

तथा चोक्तम्-

आत्मौपम्येन यो वेत्ति दुर्जनं सत्य-वादिनम् ।
स तथा वञ्च्यते धूर्तैःब्राह्मणाश् छागतो यथा ॥ ४।५८ ॥

राजोवाच-कथम् एतत् ?
मेघवर्णः कथयति-

## ०४-०९ दुष्टवञ्चकानां कथा

आत्मौपम्येन यो वेत्ति दुर्जनं सत्य-वादिनम् ।
स तथा वञ्च्यते धूर्तैःब्राह्मणाश् छागतो यथा ॥ ४।५८ ॥

अस्ति गौतमस्यारण्ये प्रस्तुत-यज्ञः कश्चिद् ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच् छागम् उपक्रीय, स्कन्धे नीत्वा, गच्छ धूर्त-त्रयेणावलोकितः । ततस् ते धूर्ताः-यद्येष छागः केनाप्युपायेन लभ्यते, तदा मति-प्रकर्षो भवतीति समालोच्य, वृक्षत्रयतले क्रोशान्तरेण तस्य ब्राह्मणस्यागमनं प्रतीक्ष्य पथि स्थिताः। तत्रैकेन धूर्तेन गच्छन् स ब्राह्मणो ऽभिहितः-भो ब्राह्मण ! किम् इति त्वया कुक्कुरः स्कन्धेनोह्यते ।विप्रेणोक्तं-नायं श्वा, किन्तु यज्ञ-च्छागः । अथान्तरस्थितेनान्येन धूर्तेन तथैवोक्तम् । तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुःनिरीक्ष्य, पुनः स्कन्धे कृत्वा दोलायमान-मतिश्चलितः ।

यतः-
मतिःदोलायते सत्यं सतामपि खलोक्तिभिः ।
ताभिःविश्वासितश् चासौ म्रियते चित्रकर्णवत् ॥ ४।५९ ॥

राजाह–कथम् एतत् ?

स कथयति-

## ०४-१० मदोत्कटसिंहकथा

मतिःदोलायते सत्यं सतामपि खलोक्तिभिः ।

ताभिःविश्वासितश् चासौ म्रियते चित्रकर्णवत् ॥ ४।५९ ॥

अस्ति कस्मिंश्चिद् वनोद्देशे मदोत्कटो नाम सिंहः । तस्य सेवकास् त्रयः काको व्याघ्रो जम्बुकश्च । अथ तैःभ्रमद्भिः सार्थ-भ्रष्टः कश्चिदुष्ट्रो दृष्टः । पृष्टश्च-कुतो भवान् आगतः सार्थाद् भ्रष्टः ?

स चात्म-वृत्तान्तमकथयत् । ततस् तैःनीत्वा सिंहायासौ समर्पितः । तेन चाभय-वाचं दत्त्वा, चित्रकर्ण इति नाम कृत्वा स्थापितः ।

अथ कदाचित् सिंहस्य शरीर-वैकल्याद् भूरि-वृष्टि-कारणाच् चाहारमलभमानास् ते व्यग्रा बभूवुः । ततस् तैःआलोचितम् । चित्रकर्णम् एव यथा स्वामी व्यापादयति तथानुष्ठीयताम् । किमनेन कण्टक-भुजास्माकम् ?

व्याघ्र उवाच- स्वामिनाभयवाचं दत्त्वानुगृहीतोऽयं, तत् कथम् एवं सम्भवति ?

काको ब्रूते- इह समये परिक्षीणः स्वामी पापमपि करिष्यति ।

यतः-

त्यजेत् क्षुधार्ता महिला स्वपुत्रं

खादेत् क्षुधार्ता भुजगी स्वमण्डम् ।

बुभुक्षितः किं न करोति पापं

क्षीणा नरा निष्करुणा भवन्ति ॥ ४।६० ॥

अन्यच्च-

मत्तः प्रमत्तश् चोन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।

लुब्धो भीरुस्त्वरा-युक्तः कामुकश्च न धर्म-वित् ॥ ४।६१ ॥

इति सञ्चिन्त्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम्- आहारार्थं किञ्चित् प्राप्तम् ?

तैःउक्तम्- देव ! यत्नादपि प्राप्तं किञ्चित् ?

सिंहेनोक्तं- कोऽधुना जीवनोपायः ?

काको वदति- देव ! स्वाधीनाहार-परित्यागात् सर्व-नाशो ऽयम् उपस्थितः ?

सिंहेनोक्तम्- अत्राहारः कः स्वाधीनः ?

काकः कर्णे कथयति- चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । अब्रवीच्च- अभय-वाचं दत्त्वा धृतोऽयमस्माभिः । तत् कथम् एवं सम्भवति ?

तथा हि-

न भूत-दानं न सुवर्ण-दानं

न गो-प्रदानं न तथान्न-दानम् ।

यथा वदन्तीह महा-प्रदानं

सर्वेषु दानेष्व् अभय-प्रदानम् ॥ ४।६२ ॥

अन्यच्च-

सर्व-काम-समृद्धस्य अश्वमेधस्य यत् फलम् ।

तत्-फलं लभते सम्यग् रक्षिते शरणागते ॥ ४।६३ ॥

काको ब्रूते- नासौ स्वामिना व्यापादयितव्यः । किन्त्व् अस्माभिःएव तथा कर्तव्यं, यथासौ स्व-देह-दानमङ्गीकरोति ।

सिंहस्तच्छ्रुत्वा तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्वान् आदाय सिंहान्तिकं गतः । अथ काकेनोक्तं- देव ! यत्नादप्याहारो न प्राप्तः । अनेकोपवास-क्लिष्टश्च स्वामी । तदिदानीं मदीय-मांसम् उपभुज्यताम् ।

यतः-

स्वामि-मूला भवन्त्य् एव सर्वाः प्रकृतयः खलु ।

समूलेष्व् अपि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥ ४।६४ ॥

सिंहेनोक्तं-भद्र ! वरं प्राण-परित्यागो, न पुनःईदृशे कर्मणि प्रवृत्तिः ।

जम्बुकेनापि तथोक्तम् । ततः सिंहेनोक्तं-मैवम् ।

अथ व्याघ्रेणोक्तं-मद्-देहेन जीवतु स्वामी ।

सिंहेनोक्तं-न कदाचिदेवम् उचितम् ।

अथ चित्रकर्णो ऽपि जात-विश्वासस्तथैवात्म-देह-दानमाह-ततस्तद्-वचनात् तेन व्याघ्रेणासौ कुक्षिं विदार्य व्यापादितः । सर्वैःभक्षितश्च ।अतोऽहं ब्रवीमि- मतिःदोलायते सत्यम् इत्यादि ।

ततस्तृतीय-धूर्त-वचनं श्रुत्वा, स्व-मति-भ्रमं निश्चित्य छागं त्यक्त्वा, ब्राह्मणः स्नात्वा गृहं ययौ । छागश्च तैःधूर्तैःनीत्वा भक्षितः ।अतोऽहं ब्रवीमि-आत्मौपम्येन यो वेत्तीत्यादि ।

राजाह- मेघवर्ण ! कथं शत्रु-मध्ये त्वया सुचिरम् उषितम् ? कथं वा तेषामनुनयः कृतः ?

मेघवर्ण उवाच- देव ! स्वामि-कार्यार्थितया स्व-प्रयोजन-वशाद् वा किं किं न क्रियते ?

पश्य-

लोको वहति किं राजन्न मूर्ध्ना दग्धुम् इन्धनम् ।

क्षालयन्त्य् अपि वृक्षाङ्घ्रिं नदी-वेला निकृन्तति ॥ ४।६५ ॥

तथा चोक्तम्-

स्कन्धेनापि वहेच् छत्रून् कार्यमासाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ४।६६ ॥

राजाह-कथम् एतत् ?

मेघवर्णः कथयति-

## सारांशः

पूर्वखण्डे समबलेन सह युद्धकरणेऽपि विनाशः भविष्यतीति पीठिका दत्ता । इदानीं कथारूपेण प्रतिपादयति मन्त्री ।

तथाहि – पूर्वस्मिन् समये सुन्दोपसुन्दनामानौ द्वौ दैत्यभ्रातरौ अवर्तेताम् । तयोः एका इच्छा असीत् । त्रिलोकराज्यप्राप्तिरिति । तदर्थं उभावपि महादेवं तपसा पूजितवन्तौ । तपसा प्रसन्नः महादेवः वरं पृच्छ्यतामिति उवाच । तदानीं सरस्वती देवी तयोः वाचि प्रविश्य अन्यद्वक्तुं कृतवती । तेन द्वावपि शिवस्य पत्नीं पार्वतीं याचितवन्तौ । तेन क्रुद्धोऽपि महादेवः वरं दत्तवान् ।

ततः परं पार्वतीं नीत्वा गतवन्तौ । परन्तु ताम् आर्हतुं तयोः मध्ये युद्धः अभूत् । समबलत्वात् उभावपि नष्टौ । तन्मध्ये एव बह्व्यः नीतयः प्रोक्ताः ।

एवं कथां श्राविते सति राजा अपृच्छत् पूर्वमेव कुतः नोक्तमिदमिति । तदानीं मन्त्री अवोचत् तदानीं भवान् मद्वाक्ये श्रद्धां न अददात् । अतः एव ईदृशी स्थितिः अभवत् ।

तदभ्यन्तरे मयूरपक्षेऽपि संवादः प्रदर्शितः । ततः परं हिरण्यगर्भः कैः सह सन्धिः न कर्तव्यः इति चक्रवाकम् अपृच्छत् । तदानीं श्लोकरूपेण महता प्रबन्धेन असन्धेयान् निरूपितवान् । तेषां लक्षणं च क्रमशः श्लोकैः निरूपितवान् ।

ततः चक्रवाकः सिंहलद्वीपराजानं महाबलमाहूय जम्बूद्वीपम् आक्रमणं कर्तुमादिष्टवान् । इदं सर्वं ज्ञात्वा गृद्ध्रस्य प्रणिधिः मयूरसभामागत्य सर्वं श्रावितवान् ।

ततः मेघवर्णः राजाज्ञया हिरण्यगर्भस्य स्वरूपं कीर्तिं च श्रावयामास । तदानीं मयूरः अपृच्छत् ईदृशः हिरण्यगर्भः कथं भवता वञ्चितः इति । तदर्थं ब्राह्मणकथां श्रावयामास मेघवर्णः ।

तथाहि – गौतमारण्ये यज्ञार्थम् एकः ब्राह्मणः अजां क्रीत्वा गच्छति स्म । तस्मिन् समये त्रिभिः धूर्तैः स दृष्टः । अजान् दृष्ट्वा ते धूर्ताः ताम् अपहर्तुकामाः अभवन् । ततः परं मार्गे एव क्रोशाभ्यन्तरे एकस्य वृक्षस्य तले एकैकः स्थित्वा- अरे! ब्राह्मण! किमर्थं कुक्कुरं स्कन्धे नीत्वा गच्छति इति अवदन् । प्रथमवारं तेन उत्तरं दत्तम् "इयम् अजा न तु कुक्कुरः" इति । द्वितीयवारमपि एवमेव उत्तरं कथितम् । परन्तु तृतीयवारं संशयमापन्नः बुद्धिमानपि ब्राह्मणः अजां त्यक्त्वा गतवान् । ततः परं ते धूर्ताः तां स्वीकृत्य गतवन्तः ।

एवं दुष्टस्य वचसा सत्यवान् अपि नश्यति इति द्योतनाय उष्ट्रव्याघ्रश्रृगालानां कथा भवति ।

तथाहि – एकस्मिन्नरण्ये मदोत्कटः नाम सिंहः आसीत् । तत्र काकः, व्याघ्रः, श्रृगालः च आसन् । कदाचित् एकः उष्ट्रः तत्रागतः । तं दृष्ट्वा कस्मादागतः भवानिति सर्वे पृष्टवन्तः ।तद्वृत्तान्तं श्रुत्वा सिंहराजा तस्य चित्रकर्ण इति नामकरणं कृतवान् ।

कदाचित् वृष्टिकाले भोजनाभावात् सर्वे मग्ना आसन् । तदा काकव्याघ्रश्रृगालाः अस्माकं स्वामिनां सविधे गत्वा चित्रकर्णं खादामः इति सूचयाम इति आलोचनं कृतवन्तः । तदर्थं कपटनाटकं कृत्वा सिंहः यथा उष्ट्रं मारयति तथा कृतवन्तः । अतः एव उक्तं सुजनोऽपि दुर्जनवाक्यात् नश्यति इति ।

**बोधप्रश्नाः**

1. समबलेन सह किं न कर्तव्यम्?

2. कः पूज्यः ?

3. सन्धेयगुणयुक्तः कः?

4. उपायाः कतिप्रकाराः? के च ते?

5. सिंहलद्वीपस्य राजा कः?

## शब्दावली

1. भट्टारकः

2. सुन्दः

3. उपसुन्दः

4. संधेयः

5. बलव्यसनसंकुलः

6. महाबलः

7. मदोत्कटः

## सन्दर्भग्रन्थः -


1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.


## सहायकग्रन्थाः –


1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.

2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.


बोधप्रश्नोत्तराणि –

1. युद्धम्

2. ज्ञानश्रेष्ठो द्विजः पूज्यः

3. हिरण्यगर्भः

4. सामदानभेददण्डरूपाः चत्वारः उपायाः

5. महाबलो नाम सारसः

अभ्यासप्रश्नाः

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थिकर्तव्याः

2. कथानां लघुपरिचयं कुरुत

3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः 5

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे आदौ मन्दमतिनामकसर्पस्य कथा भवति। इयं कथा मेघवर्णेन श्राविता भवति । तत्र स्वकार्यसिद्धये शत्रूनपि वहेत् इति नीतिः प्रदर्शिता। अतः मत्कार्यसिद्ध्यर्थं सर्वं सोढ्वा तत्रासम्। ततः परं कैस्सह सन्धिः न कर्तव्या इति नीतिः श्लोकरूपेण बोधिता। ततः परं सन्धिः कतिविधिः इति द्योतनाय सन्धेः विंशतिप्रकारान् दर्शयामास। ततः सिंहलराजा महाबलो जम्बूद्वीपस्य आक्रमणं कृतवानिति शुकेन श्रावितां कठोरवार्तां श्रुत्वा भीतः मयूरः दूरदर्शिनं पप्रच्छ। ततः दूरदर्शी सन्धये हिरण्यगर्भस्य कुटीरं गतवान्। तं च संयगभ्यर्च्य काञ्चनाभिधानसन्धिमङ्गीचकार। ततः सर्वे स्वराज्यं परिपाल्य सुखेन निवसन्ति स्म इति सन्धिप्रसंगं समापितवान् विष्णुशर्मा। ततः संजातहर्षाः राजापुत्राः अपि कृतज्ञतां विनिवेदितवन्तः इति कथायाः समाप्तिः वर्णिता।

## उद्देश्यम्

- बहुविधसंधीनां ज्ञानं प्राप्नोति
- कार्यं कथं साधयितुं शक्यते इति ज्ञानं भवति
- तीव्रालोचनं विना कोऽपि निर्णयः न स्वीकर्तव्यः इति विजानाति
- विभिन्नशब्दानां परिचयो भवति।
- विभिन्नदेशानां ज्ञानं जायते।

## ०४-११ मन्दविषसर्पकथा

स्कन्धेनापि वहेच् छत्रून् कार्यमासाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ४।६६ ॥

अस्ति जीर्णोद्याने मन्दविषो नाम सर्पः । सो ऽतिजीर्णतया स्वाहारमप्यन्वेष्टुमक्षमः सरस्-तीरे पतित्वा स्थितः । ततो दूरादेव केनचिन् मण्डूकेन दृष्टः, पृष्टश्च-किम् इति त्वामाहारं नान्विष्यति ? सर्पोऽवदत्- गच्छ भद्र ! किं ते मम मन्द-भाग्यस्य वृत्तान्त-प्रश्नेन ? ततः सञ्जात-कौतुकः स च भेकः सर्वथा कथ्यताम् इत्याह । सर्पोऽप्याह- भद्र ! पुर-वासिनः श्रोत्रियस्य कौण्डिन्यस्य पुत्रो विंशति-वर्ष-देशीयः सर्व-गुण-सम्पन्नो दुर्दैवान् मया नृशंसेन दष्टः । ततस् तं सुशील-नामानं पुत्रं मृतमवलोक्य, शोकेन मूर्च्छितः कौण्डिन्यः पृथिव्यां लुलोठ । अनन्तरं ब्रह्मपुर-वासिनः सर्वे बान्धवास्तत्रागत्योपविष्टाः ।

तथा चोक्तम्-

उत्सवे व्यसने युद्धे दुर्भिक्षे राष्ट्र-विप्लवे ।

राज-द्वारे श्मशाने च यस् तिष्ठति स बान्धवः ॥ ४।६७ ॥

तत्र कपिलो नाम स्नातकोऽवदत्-अरे कौण्डिन्य ! मूढोऽसि येनैवं विलपसि ।

शृणु-

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।

धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥ ४।६८ ॥

तथा च-

क्व गताः पृथिवी-पालाः स-सैन्य-बल-वाहनाः ।

वियोग-साक्षिणी येषां भूमिःअद्यापि तिष्ठति ॥ ४।६९ ॥

तथा च-

जातस्य हि ध्रुवो मृत्युःध्रुवं जन्म मृतस्य च ।

अद्य वाब्द-शतान्ते वा मृत्युःवै प्राणिनां ध्रुवः ॥ ४।७० ॥

अपरं च-

कायः सन्निहितापायः सम्पदः पदमापदाम् ।

समागमाः सापगमाः सर्वम् उत्पादि भङ्गुरम् ॥ ४।७१ ॥

प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते ।

आमकुम्भ इवाम्भः-स्थो विशीर्णः सन् विभाष्यते ॥ ४।७२ ॥

आसन्नतरतामेति मृत्युःजन्तोःदिने दिने ।

आघातं नीयमानस्य वध्यस्येव पदे पदे ॥ ४।७३ ॥

यतः-

अनित्यं यौवनं रूपं जीवितं द्रव्य-सञ्चयः ।

ऐश्वर्यं प्रिय-संवासो मुह्येत् तत्र न पण्डितः ॥ ४।७४ ॥

यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।

समेत्य च व्यपेयातां तद्वद् भूत-समागमः ॥ ४।७५ ॥

यथा हि पथिकः कश्चिच् छायामाश्रित्य तिष्ठति ।

विश्रम्य च पुनःगच्छेद् तद्वद् भूत-समागमः ॥ ४।७६ ॥

अन्यच्च-

पञ्चभिःनिर्मिते देहे पञ्चत्वं च पुनःगते ।

स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना ॥ ४।७७ ॥

यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् ।

तावन्तोऽस्य निखन्यन्ते हृदये शोक-शङ्कवः ॥ ४।७८ ॥

नायमत्यन्त-संवासो लभ्यते येन केनचित् ।

अपि स्वेन शरीरेण किम् उतान्येन केनचित् ॥ ४।७९ ॥

अपि च-

संयोगो हि वियोगस्य संसूचयति सम्भवम् ।

अनतिक्रमणीयस्य जन्म मृत्योःइवागमम् ॥ ४।८० ॥

आपात-रमणीयानां संयोगानां प्रियैः सह ।

अपथ्यानाम् इवान्नानां परिणामो हि दारुणः ॥ ४।८१ ॥

अपरं च-

व्रजन्ति न निवर्तन्ते स्रोतांसि सरितां यथा ।

आयुःआदाय मर्त्यानां तथा रात्र्य्-अहनी सदा ॥ ४।८२ ॥

सुखास्वाद-परो यस् तु संसारे सत्-समागमः ।

स वियोगावसानत्वाद् दुःखानां धुरि युज्यते ॥ ४।८३ ॥

अत एव हि नेच्छन्ति साधवः सत्-समागमम् ।

यद्-वियोगासि-लूनस्य मनसो नास्ति भेषजम् ॥ ४।८४ ॥

सुकृतान्यपि कर्माणि राजभिः सगरादिभिः ।

अथ तान्य् एव कर्माणि ते चापि प्रलयं गताः ॥ ४।८५ ॥

सञ्चिन्त्य सञ्चिन्त्य तम् उग्र-दण्डंमृत्युं मनुष्यस्य विचक्षणस्य ।

वर्षाम्बु-सिक्ता इव चर्म-बन्धाःसर्वे प्रयत्नाः शिथिलीभवन्ति ॥ ४।८६ ॥

याम् एव रात्रिं प्रथमाम् उपैत गर्भे निवासं नरवीर लोकः ।

ततः प्रभृत्यस्खलित-प्रयाणःस प्रत्यहं मृत्यु-समीपम् एति ॥ ४।८७ ॥

अज्ञानं कारणं न स्याद् वियोगो यदि कारणम् ।

शोको दिनेषु गच्छत्सु वर्धतामपयाति किम् ॥ ४।८८ ॥

तद् भद्र ! तदात्मानमनुसन्धेहि । शोक-चर्चां च परिहर,

यतः-

अकाण्ड-पात-जातानामस्त्राणां मर्म-भेदिनाम् ।

गाढ-शोक-प्रहाराणामचिन्तैव महौषधम् ॥ ४।८९ ॥

ततस्तद्वचनं निशम्य, प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत् । तदलम् इदानीं गृह-नरक-वासेन वनम् एव गच्छामि ।

कपिलः पुनःआह-

वनेऽपि दोषाः प्रभवन्ति रागिणांगृहेऽपि पञ्चेन्द्रिय-निग्रहस्तपः ।

अकुत्सिते कर्मणि यः प्रवर्ततेत्रिवृत्त-रागस्य गृहं तपोवनम् ॥ ४।९० ॥

यतः-

दुःखितोऽपि चरेद् धर्मं यत्र कुत्राश्रमे रतः ।

समः सर्वेषु भूतेषु न लिङ्गं धर्म-कारणम् ॥ ४।९१ ॥

उक्तं च-

वृत्त्य्-अर्थं भोजनं येषां सन्तानार्थं च मैथुनम् ।

वाक् सत्य-वचनार्थाय दुर्गाण्य् अपि तरन्ति ते ॥ ४।९२ ॥

तथा हि-

आत्मा नदी संयमपुण्य-तीर्थासत्योदका शील-तटा दयोर्मिः ।

तत्राभिषेकं कुरु पाण्डु-पुत्र !न वारिणा शुष्यति चान्तरात्मा ॥ ४।९३ ॥

विशेषतश्च-

जन्म-मृत्यु-जरा-व्याधि-वेदनाभिःउपद्रुतम् ।

संसारम् इमम् उत्पन्नमसारं त्यजतः सुखम् ॥ ४।९४ ॥

यतः-

दुःखम् एवास्ति न सुखं यस्मात् तदुपलक्ष्यते ।

दुःखार्तस्य प्रतीकारे सुख-सञ्ज्ञा विधीयते ॥ ४।९५ ॥

कौण्डिन्यो ब्रूते-एवम् एव । ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तो, यदद्यारभ्य मण्डूकानां वाहनं भविष्यतीति ।कपिलो ब्रूते-सम्प्रत्युपदेशासहिष्णुःभवान् । शोकाविष्टं ते हृदयम् ।

तथापि कार्यं शृणु-

सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।

स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् ॥ ४।९६ ॥

अन्यच्च-

कामः सर्वात्मना हेयः स चेद् धातुं न शक्यते ।

स्वभार्यां प्रति कर्तव्यः सैव तस्य हि भेषजम् ॥ ४।९७ ॥

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशामृत-प्रशान्त-शोकानलो यथाविधि दण्ड-ग्रहणं कृतवान् । अतो ब्राह्मण-शापान् मण्डूकान् वोढुमत्र तिष्ठामि । अनन्तरं तेन मण्डूकेन गत्वा मण्डूक-नाथस्य जालपादनाम्नोऽग्रे तत् कथितम् । ततोऽसावागत्य मण्डूक-नाथस्तस्य सर्पस्य पृष्ठमारूढवान् । स च सर्पस् तं पृष्ठे कृत्वा चित्रपद-क्रमं बभ्राम ।

परेद्युश्चलितुमसमर्थं तं मण्डूक-नाथमवदत्- किमद्य भवान् मन्दगतिः ?

सर्पो ब्रूते- देव ! आहार-विरहादसमर्थो ऽस्मि ।

मण्डूकनाथोऽवदत्- अस्मादाज्ञया मण्डूकान् भक्षय । ततः गृहीतोऽयं महा-प्रसाद इत्युक्त्वा क्रमशो मण्डूकान् खादितवान् । अथ निर्मण्डूकं सरो विलोक्य मण्डूक-नाथो ऽपि तेन खादितः ।

अतोऽहं ब्रवीमि- स्कन्धेनापि वहेच् छत्रून् इत्यादि ।

देव! यात्व् इदानीं पुरावृत्ताख्यान-कथनं सर्वथा सन्धेयो ऽयं हिरण्यगर्भ-राजा सन्धीयताम् इति मे मतिः ।

राजोवाच- कोऽयं भवतो विचारः ? यतो जितस्तावदयमस्माभिः । ततो यद्यस्मत् सेवया वसति, तदास्ताम् । नो चेद् विगृह्यताम् ।

अत्रान्तरे जम्बूद्वीपादागत्य शुकेनोक्तं-देव ! सिंहल-द्वीपस्य सारसो राजा सम्प्रति जम्बूद्वीपमाक्रम्यावतिष्ठते ।राजा ससम्भ्रमं ब्रूते-किं किम् ?शुकः पूर्वोक्तं कथयति ।

गृध्रः स्वगतम् उवाच-साधु रे चक्रवाक मन्त्रिन् ! साधु !

राजा सकोपमाह- आस्तां तावदयं गत्वा तम् एव समूलम् उन्मूलयामि ।

दूरदर्शी विहस्याह-

न शरन्-मेघवत् कार्यं वृथैव घन-गर्जितम् ।
परस्यार्थमनर्थं वा प्रकाशयति नो महान् ॥ ४।९८ ॥

अपरं च-

एकदा न विगृह्णीयाद् बहून् राजाभिघातिनः ।
स-दर्पो ऽप्युरगः कीटैःबहुभिःनाश्यते ध्रुवम् ॥ ४।९९ ॥
यो ऽर्थ-तत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद् यथा ॥ ४।१०० ॥

राजाह–कथम् एतत् ?
दूरदर्शी कथयति-

## ०४-१२ ब्राह्मणनकुलकथा

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद् यथा ॥ ४।१०० ॥

अस्त्युज्जयिन्यां माधवो नाम विप्रः । तस्य ब्राह्मणी प्रसूता, बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणाय राज्ञः पार्वण-श्राद्धं दातुमाह्वानमागतम् । तच् छ्रुत्वा ब्राह्मणो ऽपि सहज-दारिद्र्यादचिन्तयत्- यदि सत्वरं न गच्छामि, तदान्या कश्चिच् छ्रुत्वा श्राद्धं ग्रहीष्यति ।

यतः-

आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्-रसम् ॥ ४।१०१ ॥

किन्तु बालाकस्यात्र रक्षको नास्ति । तत् किं करोमि ? यातु, चिर-काल-पालितम् इमं नकुलं पुत्र-निर्विशेषं बालक-रक्षायां व्यवस्थाप्य गच्छामि । तथा कृत्वा गतः । ततस् तेन नकुलेन बालक-समीपमागच्छन् कृष्ण-सर्पो दृष्टो व्यापाद्य कोपात् खण्डं खण्डं कृत्वा भक्षितश्च । ततोऽसौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्त-विलिप्त-मुख-पदः सत्वरम् उपगम्य तच्-चरणयोःलुलोठ । ततः स विप्रस्तथा-विधं दृष्ट्वा मम बालकोऽनेन खादित इत्यवधार्य नकुलः व्यापादितवान् । अनन्तरं यावदुपसृत्यापत्यं पश्यति ब्राह्मणस्तावद् बालकः सुस्थः स्वपिति सर्पश्च व्यापादितस् तिष्ठति । ततस्तम् उपकारकं नकुलं निरीक्ष्य, भावित-चेताः स ब्राह्मणः परं विषादमगमत् ।

अतोऽहं ब्रवीमि- योऽर्थतत्त्वमविज्ञाय इत्यादि ।

अपरं च-

कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।

षड्-वर्गम् उत्सृजेदेनं तस्मिंस् त्यक्ते सुखी नृपः ॥ ४।१०२ ॥

राजाह- मन्त्रिन् ! एष ते निश्चयः ?

मन्त्री ब्रूते- एवम् एव ।

यतः-

स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः ।

दृढता मन्त्र-गुप्तिश्च मन्त्रिणः परमो गुणः ॥ ४।१०३ ॥

तथा च-

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

वृणुते हि विमृश्य कारिणं गुण-लुब्धाः स्वयम् एव सम्पदः ॥ ४।१०४ ॥

तद्देव ! यदीदानीमस्मद्वचनं क्रियते, तदा सन्धाय गम्यताम् ।

यतः-

यद्यप्युपायाश्चत्वारो निर्दिष्टाः सध्य-साधने ।
सङ्ख्या-मात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता ॥ ४।१०५ ॥

राजाह-कथम् एवं सत्वरं सम्भाव्यते ?
मन्त्री ब्रूते-देव ! सत्वरं भविष्यति ।

यतः-
मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस् तु कनक-घटवद् दुर्भेद्यश् चाशु सन्धेयः ॥ ४।१०६ ॥
अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञान-लव-दुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ४।१०७ ॥
कर्मानुमेयाः सर्वत्र परोक्ष-गुण-वृत्तयः ।
तस्मात् परोक्ष-वृत्तीनां फलैः कर्म विभावयेत् ॥ ४।१०८ ॥

राजाह-अलम् उत्तरोत्तरेण, यथाभिप्रेतमनुष्ठीयताम् । एतन्मन्त्रयित्वा गृध्रो महामन्त्री-तत्र यथार्हं कर्तव्यम् इत्युक्त्वा दुर्गाभ्यन्तरं चलितः । ततः प्रणिधि-बकेनागत्य राज्ञी हिरण्यगर्भस्य निवेदितं-देव ! सन्धि-कर्तुं महामन्त्री गृध्रोऽस्मत्-समीपमागच्छति ।
राजहंसो ब्रूते- मन्त्रिन् ! पुनःअभिसन्धिना केनचिदत्रागमनम् ।
सर्वज्ञो विहस्याह- देव ! न शङ्कास्पदम् एतत् । यतोऽसौ महाशयो दूरदर्शी । अथवा स्थितिःइयं मन्द-मतीनां, कदाचिच् छङ्कैव न क्रियते, कदाचित् सर्वत्र शङ्का ।

तथा हि-
सरसि बहुशस्ताराच्छायेक्षणात् परिवञ्चितः

कुमुद-विटपान्वेषी हंसो निशास्वविचक्षणः ।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहुक-चकितो लोकः सत्येऽप्यपायमपेक्षते ॥ ४।१०९ ॥
दुर्जन-दूषित-मनसः सुजनेष्व् अपि नास्ति विश्वासः ।
बालः पायस-दग्धो दध्य् अपि फूत्कृत्य भक्षयति ॥ ४।११० ॥

तद्देव ! यथा-शक्ति तत्-पूजार्थं रत्नोपहारादि-सामग्री सुसज्जीक्रियताम् । तथानुष्ठिते सति स गृध्रो दुर्ग-द्वाराच्चक्रवाकेणोपगम्य, सत्कृत्यानीय राज-दर्शनं कारितो दत्तासने चोपविष्टः । चक्रवाक उवाच- मन्त्रिन् ! युष्मद्-आयत्तं सर्वं स्वेच्छयोपभुज्यताम् इदं राज्यम् ।
राजहंसो ब्रूते-एवम् एव ।
दूरदर्शी कथयति- एवम् एवैतत् । किन्त्व् इदानीं बहु-प्रपञ्च-वचनं निष्प्रयोजनम् ।

यतः-
लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलि-कर्मणा ।
मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितम् ॥ ४।१११ ॥

अन्यच्च-
सद्-भावेन हरेन् मित्रं सम्भ्रमेण तु बान्धवान् ।
स्त्री-भृत्यौ दान-मानाभ्यां दाक्षिण्येनेतरान् जनान् ॥ ४।११२ ॥

तदिदानीं सन्धातुं गम्यताम् । महा-प्रतापश् चित्रवर्णो राजा ।चक्रवाको ब्रूते-यथा सन्धानं कार्यम् । तदप्युच्यताम् ।
राजहंसो ब्रूते- कति प्रकाराः सन्धीनां सम्भवन्ति ?

गृध्रो ब्रूते- कथयामि श्रूयताम्-

बलीयसाभियुक्तस्तु नृपो नान्य-प्रतिक्रियः ।

आपन्नः सन्धिमन्विच्छेत् कुर्वाणः काल-यापनम् ॥ ४।११३ ॥

कपाल उपहारश्च सन्तानः सङ्गतस्तथा ।

उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ ४।११४ ॥

अदृष्ट-नर आदिष्ट आत्मामिष उपग्रहः ।

परिक्रयस्तथोच्छिन्नस्तथा च पर-दूषणः ॥ ४।११५ ॥

स्कन्धोपनेयः सन्धिश्च षोडशः परकीर्तितः ।

इति षोडशकं प्राहुः सन्धिं सन्धि-विचक्षणाः ॥ ४।११६ ॥

कपाल-सन्धिःविज्ञेयः केवलं सम-सन्धिकः ।

सम्प्रदानाद् भवति य उपहारः स उच्यते ॥ ४।११७ ॥

सन्तान-सन्धिःविज्ञेयो दारिका-दान-पूर्वकः ।

सद्भिस् तु सङ्गतः सन्धिःमैत्री-पूर्व उदाहृतः ॥ ४।११८ ॥

यावदायुः-प्रमाणस् तु समानार्थ-प्रयोजनः ।

सम्पत्तौ वा विपत्तौ वा कारणैःयो न भिद्यते ॥ ४।११९ ॥

सङ्गतः सन्धिःएवायं प्रकृष्टत्वात् सुवर्णवत् ।

तथान्यैः सन्धि-कुशलैः काञ्चनः समुदाहृतः ॥ ४।१२० ॥

आत्म-कार्यस्य सिद्धिं तु समुद्दिश्य क्रियेत यः ।

स उपन्यास-कुशलैःउपन्यास उदाहृतः ॥ ४।१२१ ॥

मयास्योपकृतं पूर्वं ममाप्य् एष करिष्यति ।

इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥ ४।१२२ ॥

उपकारं करोम्य् अस्य ममाप्य् एष करिष्यति ।

अयं चापि प्रतीकारो राम-सुगृईवयोःइव ॥ ४।१२३ ॥

एकार्थां सम्यग् उद्दिश्य यात्रां यत्र हि गच्छतः ।

सुसंहित-प्रयाणस् तु सन्धिः संयोग उच्यते ॥ ४।१२४ ॥

आवयोःयोध-मुख्याभ्यां मद्-अर्थः साध्यताम् इति ।

यस्मिन् पणः प्रक्रियते स सन्धिः पुरुषान्तरः ॥ ४।१२५ ॥

त्वयैकेन मदीयो ऽर्थः सम्प्रसाध्यस् त्व् असाव् इति ।

यत्र शत्रुः पणं कुर्यात् सो ऽदृष्ट-पुरुषः स्मृतः ॥ ४।१२६ ॥

यत्र भूम्य्-एक-देशेन पणेन रिपुःऊर्जितः ।

सन्धीयते सन्धि-विद्भिः स चादिष्ट उदाहृतः ॥ ४।१२७ ॥

स्व-सैन्येन तु सन्धानमात्मादिष्ट उदाहृतः ।

क्रियते प्राण-रक्षार्थं सर्व-दानादुपग्रहः ॥ ४।१२८ ॥

कोशांशेनार्ध-कोशेन सर्व-कोशेन वा पुनः ।

शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः ॥ ४।१२९ ॥

भुवां सारवतीनां तु दानादुच्छिन्न उच्यते ।

भूम्य्-उत्थ-फल-दानेन सर्वेण पर-भूषणः ॥ ४।१३० ॥

परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।

स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धि-विचक्षणाः ॥ ४।१३१ ॥

परस्परोपकारस् तु मैत्री सम्बन्धकस्तथा ।

उपहारश्च विज्ञेयाश्चत्वारश् चैव सन्धयः ॥ ४।१३२ ॥

एक एवोपहारस् तु सन्धिःएतन्मतं हि नः ।

उपहारस्य भेदास् तु सर्वेऽन्ये मैत्र-वर्जिताः ॥ ४।१३३ ॥

अभियोक्ता बली यस्मादलब्ध्वा न निवर्तते ।

उपहाराद् ऋते तस्मात् सन्धिःअन्यो न विद्यते ॥ ४।१३४ ॥

राजाह-भवन्तो महान्तः पण्डिताश्च । तदत्रास्माकं यथा-कार्यम् उपदिश्यताम् ।

दूरदर्शी ब्रूते- आः किम् एवम् उच्यते?

आधि-व्याधि-परीतापादद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ ४।१३५ ॥
जलान्तश्चन्द्र-चपलं जीवितं खलु देहिनाम् ।
तथा-विधम् इति ज्ञात्वा शश्वत्-कल्याणमाचरेत् ॥ ४।१३६ ॥
वाताभ्र-विभ्रमम् इदं वसुधाधिपत्यम्
आपात-मात्र-मधुरो विषयोपभोगः ।
प्राणास् तृणाग्र-जल-बिन्दु-समान-लोला
धर्मः सखा परमहो परलोक-याने ॥ ४।१३७ ॥
मृग-तृष्णा-समं वीक्ष्य संसारं क्षण-भङ्गुरम् ।
सज्जनैः सङ्गतं कुर्याद् धर्माय च सुखाय च ॥ ४।१३८ ॥

तन्मम सम्मतेन तदेव क्रियताम् ।

यतः-

अश्वमेध-सहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेध-सहस्राद् धि सत्यम् एव विशिष्यते ॥ ४।१३९ ॥

अतः सत्याभिधान-दिव्य-पुरःसरमनयोःभूपालयोः काञ्चनाभिधानः सन्धिःविधीयताम् । सर्वज्ञो ब्रूते-एवमस्तु । ततो राजहंसेन राज्ञा वस्त्रालङ्कारोपहारैः स मन्त्री दूरदर्शी पूजितः । प्रहृष्ट-मनाश्चक्रवाकं

गृहीत्वा, राज्ञो मयूरस्य सन्निधानं गतः । तत्र चित्रवर्णेन राज्ञा सर्वज्ञो गृध्र-वचनाद् बहु-मान-दान-पुरः-सरं सम्भाषितस्तथा-विधं सन्धिं स्वीकृत्य राजहंस-समीपं प्रस्थापितः ।

दूरदर्शी ब्रूते- देव ! सिद्धं नः समीहितम् । इदानीं स्वस्थानम् एव विन्ध्याचलं व्यावृत्य प्रतिगम्यताम् ।

अथ सर्वे स्व-स्थानं प्राप्य, मनाभिलषितं फलं प्राप्नुवन्न् इति ।

विष्णुशर्मेनोक्तं- अपरं किं कथयामि, तदुच्यताम् ।

राज-पुत्रा ऊचुः- आर्य ! तव प्रसादात् सकल-राज्य-व्यवहाराङ्गं जातम् । ततः सुखिनो भूता वयम् ।

विष्णुशर्मोवाच- यद्यप्य् एवं तथाप्यपरमपीदमस्तु ।

सन्धिः सर्व-मही-भुजां विजयिनामस्तु प्रमोदः सदा
सन्तः सन्तु निरापदः सुकृतिनां कीर्तिश् चिरं वर्धताम् ।
नीति-वार-विलासिनीव सततं वक्षः-स्थले संस्थिता
वक्त्रं चुम्बतु मन्त्रिणामहरहःभूयान् महान् उत्सवः ॥ ४।१४० ॥

अन्यच्चास्तु-

प्रालेयाद्रेः सुतायाः प्रणय-निवसतिश्चन्द्रमौलिः स यावद्
यावल् लक्ष्मीःमुरारेःजलद इव तडिन् मानसे विस्फुरन्ती ।
यावत् स्वर्णाचलो ऽयं दव-दहन-समो यस्य सूर्यः स्फुलिङ्गस्
तावन् नारायणेन प्रचरतु रचितः सङ्ग्रहो ऽयं कथानाम् ॥ ४।१४१ ॥

किं च-

उर्वीम् उद्दाम-सस्यां जनयतु विसृजन् वासवो वृष्टिम् इष्टाम् इष्टैस्त्रैविष्टपानां विदधतु विधिवत् प्रीणनं विप्र-मुख्याः ।

आकल्पान्तं च भूयात् स्थिर-समुपचिता सङ्गतिः

सज्जनानां निःशेषं यान्तु शान्तिं पिशुन-जन-गिरो दुःसहा वज्र-लेपाः ॥ ४।१४२ ॥

अपरं च-

श्रीमान्धवलचन्द्रो ऽसौ जीयान् माण्डलिको रिपून् ।

येनायं सङ्ग्रहो यत्नाल् लेखयित्वा प्रचारितः ॥ ४।१४३ ॥

## इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासङ्ग्रहः

## ॥ समाप्तश्चायं हितोपदेशग्रन्थः ॥

### सारांशः

अस्मिन् खण्डे प्रथमतः वृद्धसर्पकथा भवति । तत्र हि वुद्धिमान् स्वकार्यसंपादनाय शत्रूनपि स्वस्कन्धोपरि वहेदिति सूच्यते ।

तथाहि – जीर्णोद्याने मन्दविषो नाम सर्प आसीत् । सः अत्यन्तवार्धक्यात् भोजनमाहर्तुम् असमर्थः आसीत् । तं दूरात् पश्यति एकः मण्डूकः । किमर्थं भोजनं न क्रियत इति अपृच्छत् । तदानीं सर्पः अवदत् – मम दौर्भाग्यमिदम् । अथापि तव कौतूहलं दृष्ट्वा कथयामि मम वृत्तान्तमिति स्ववृत्तान्तं कथयामास । तथाहि –

कौण्डिन्यो नाम ब्राह्मणः आसीत् । अहं ब्रह्मपुत्रग्रामे तस्य विंशतिवयोविशिष्टस्य पुत्रस्य सुशीलस्य दंशनमकरवम् । तेन स मृतः जातः ।

एतज्ज्ञात्वा कौण्डिन्यस्य मूर्छा संजाता । तदानीं कपिलो नाम गृहस्थः तत्रागत्य किमर्थं मुढरूपेण आलापं कुर्वन्नस्तीति पप्रच्छ । तदर्थं बह्व्यः नीतयः अपि अनेन प्रदर्शिताः सन्ति । तत्सर्वं वेदान्तसंबद्धा भवन्ति ।

वस्तुतत्त्वं ज्ञात्वा कौण्डिन्यः अरण्यं गच्छामीति अवोचत् । परन्तु मम कृते शापं दत्तवान् “मण्डूकस्य वाहनं भवतु भवानिति” ।

एतद्वृत्तान्तं सर्वं ज्ञात्वा मण्डूकनाथस्य सविधे सर्वं श्रावितवान् मण्डूकः। सोऽपि एनं सर्पं स्वीकृत्य तदुपरि स्थित्वा चलितः। परन्तु मन्दगतिः सर्पः भोजनं पप्रच्छ। तदानीं मण्डूकनाथः सर्वान् मण्डूकान् अत्र विद्यमानान् आहरेति अवदत्। सर्पोऽपि सर्वान् भुक्त्वा मण्डूकनाथमपि भुक्तवान्। अतः स्वकार्यसंपादनाय शत्रूनपि वहेदिति नीतिः परिस्फुरति।

ततः परम् अयं हिरण्यगर्भः सन्धेय एव इति मेघवर्णः अवदत्। परन्तु गर्वी राजा तद् वाक्यं न आदृतवान्। तस्मिन्नेव समये जम्बूद्वीपं आक्रमणं कृतवान् सिंहलद्वीपराजा सारसः। भीतः मयूरराजा किं कर्तव्यमिति गृध्रस्य सकाशे अपृच्छत्। गृध्रः चक्रवाकस्य सामर्थ्यं प्रशंसितवान्। ततः परं तेन सन्धिरेव कर्तव्या अन्या गतिः नास्ति इति उपदेशमकारि। यदि एतद् अस्वीकृत्य युद्धः क्रियते तदा ब्राह्मणः यथा नकुलं हत्वा दुःखितः तद्वत् भवतामपि दुःखमेव भवतीति कथां श्रावयति गृध्रः।

तथाहि उज्जयिन्यां माधवो नाम ब्राह्मण आसीत्। तस्य पत्नी स्वपुत्रं रक्षितुम् पतिमुवाच। तस्मिन् समये राजकार्यं प्राप्तमिति कृत्वा नकुलं रक्षकं स्थापयित्वा गतः। तदानीमेकः सर्पः तत्र दृष्टः नकुलेन। तं हत्वा रक्तेन सह ब्राह्मणसमीपं गतः सः। तद्गते च पुत्रमेव हत्वा आगच्छति नकुलः इति मत्वा तं हतवान्। ततः परं जीवितं पुत्रं दृष्ट्वा दुःखितः च। अतः वस्तुस्थितिं ज्ञात्वैव कार्यं कर्तव्यम् न तु अज्ञात्वा इति नीतिं बोधयति इयं कथा।

ततः परं चक्रवाकः गृध्रं उपसृत्य सन्धिविषये संभाषणम् अकरोत्। ततः बह्व्यः नीतयः प्रतिपादिताः। ततः परं सन्धिं प्राप्य सर्वे स्वदेशं गतवन्तः स्वराज्यं च सम्यक् पालितवन्तः इति कथां समापितवान् विष्णुशर्मा।

एतत्सर्वं श्रुत्वा राजपुत्राः अपि कृतकृत्याः संजाताः विष्णुशर्मणे धन्यवादांश्च समर्पितवन्तः इति खण्डसारः।

## बोधप्रश्नाः

1. सर्पः कमहनत्?
2. परोक्षगुणवृत्तयः कीदृशाः भवन्ति?

3. स्त्रीभृत्यौ कथं स्ववशं नयेत्?
4. सन्धिः कतिविधः?
5. द्वयोः राज्ञोः कीदृशसन्धिरभूत्?

## शब्दावली

1. मन्दविषः
2. कपिलः
3. रत्नोपहारादिसामग्री
4. दुर्जनदूषितमनसः
5. कालयापनम्
6. अभियोक्ता
7. स्वर्णाचलः

## सन्दर्भग्रन्थः -


1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.


## सहायकग्रन्थाः –


1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.


## बोधप्रश्नोत्तराणि –

1. कौण्डिन्यस्य पुत्रं सुशीलम्
2. कर्मानुमेयाः
3. दानमानाभ्याम्
4. २०

5. काञ्चनाभिधानसन्धिः

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थीकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

***************